दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लद्वादशी
भाद्रपद 08 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-305 | 1 | अगस्त 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 गार्डन-रीच-शिपबिल्डर्स-एण्ड-इञ्जिनियर्स इति संस्था भविष्यकाले पोतनिर्माणक्षेत्रे अग्रणीभूमिकां निर्वोढुं शक्नोति - राजनाथसिंहः

4 मुख्यमन्त्री सुक्खु-महोदयस्य वाराणस्यां पर्यटन- सञ्चालकेभ्यः विशेष-आग्रहः- पर्यटकेभ्यः दर्शयन्तु हिमाचलस्य अस्पृष्टानि पर्यटनस्थलानि

9 "संस्कृत कथा मञ्जरी"{७} ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।। "अथ दानशक्तिवर्णनं नाम प्रथमोख्यानम्"


## प्रधानमन्त्रिणा नरेन्द्रमोदिना दृढपरिस्थिति-व्यवस्थायाः निर्माणाय, वैश्विकप्रतिभाः आकर्षणाय च अन्तरिक्ष-नवोद्यम-संस्थानेभ्यः आग्रहः कृतः; राष्ट्रिय-अन्तरिक्ष-दिवसस्य शुभाशयाः च प्रेषिताः



प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् अन्तरिक्षक्षेत्रस्य नवोद्यमाः प्रशासने स्वविश्वासं प्रकटितवन्तः। अन्तरिक्षक्षेत्रस्य नवोद्यम-संस्थानां मुख्यकार्याधिकारिभिः सह संवादावधौ श्रीमोदी तान् स्वप्रयत्नेषु निरन्तरतां रक्षितुं अथ विश्वस्य सर्वेभ्यः भागेभ्यः च प्रतिभाः आकर्षितुं समर्थं सुदृढम् अन्तरिक्षक्षेत्रीयं पारितन्त्रं निर्मातुं प्रेरितवान्। असौ उक्तवान् यत् देशे अनुकूलं वातावरणं निर्मातव्यम्, यत्र विश्वस्य सर्वेभ्यः भागेभ्यः जनाः अन्तरिक्षक्षेत्रे स्ववृत्तिं भविष्यं च निर्मातुं भारतं प्राथमिकतया गन्तव्यस्थानम् इति पश्येयुः। श्रीमोदी उक्तवान् यत् व्ययस्य दृष्ट्या भारतम् अत्यन्तं प्रतिस्पर्धाक्षमम् अस्ति, अथ च अत्र गुणवत्तापूर्णाः प्रतिभाः सन्ति, यासु सङ्कट स्वीकरणस्य दृढा क्षमता वर्तते। प्रधानमन्त्री उक्तवान् यत् एतयोः विशेषतयोः संयोगेन भारतं वैश्विके अन्तरिक्षक्षेत्रे शीघ्रमेव श्रेष्ठस्थानं स्थापयितुं समर्थम् अस्ति। संवादावधौ भारतस्य 'स्कायरूट एयरोस्पेस' इत्यस्य संस्थानस्य मुख्यकार्याधिकारी पवनकुमारचन्दना अन्तरिक्षक्षेत्रे निजक्षेत्र-उद्भा जिय प्रधानमन्त्रिणं मोदिनं प्रति आभारं प्रकटितवान्।

## अद्यतनीयं सुभाषितम्

**आरोप्यते शिला शैले यत्नेन महता यथा।**
**निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः॥**
(हितोपदेश, सुहृद्भेद- ४७)

अर्थात्- जैसे पर्वत पर बड़े यत्न से पत्थर कि चट्टान चढ़ाई जाती है और क्षणभर में गिरा दी जाती है वैसे ही मनुष्य के चित्त की वृत्ति भी गुण और दोष में लगाई और हटा ली जाती है अर्थात् मनुष्य की उन्नति कठिनता से और अवनति सहज में होती है।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा


## ब्रिक्स्-क्रीडामन्त्रिमण्डलेन ब्रिक्स-क्रीडा-संयुक्त घोषणा सर्वसम्मत्या स्वीकृतम्




ब्रिक्स-क्रीडा-संयुक्त-घोषणा सर्वसम्मत्या स्वीकृत्य, आन्ध्रप्रदेशस्य विशाखापत्तनम नगरे ब्रिक्स-क्रीडा-मन्त्रिणां सभा समाप्ता। घोषणापत्रे ब्रिक्स-देशानां क्रीडाविषये संवादस्य, परस्पर-सम्मानस्य, समावेशनस्य च माध्यमेन सहकारं सुदृढीकर्तुं प्रतिबद्धतां पुनरुद्धाप्तिम्। भारतस्य ब्रिक्स्-अध्यक्षतायां षड्विंशत्यधिक-द्विसहस्रतमे वर्षे आयोजितायाम् अस्यां सभायां क्रीडामन्त्रिणः सदस्यराष्ट्राणां वरिष्ठप्रतिनिधयः च मिलित्वा क्रीडाविकासं, युव-सहभागित्वं, अन्ताराष्ट्रियसहयोगं च प्रोत्साहनाय उपायान् चर्चितवन्तः। केन्द्रीय-युव-कार्य-क्रीडा-मन्त्री डॉ. मनसुख-माण्डविया स्वस्य प्रारम्भिक भाषणे व्यावहारिक-निरन्तर-सहकार्येण सुदृढ-ब्रिक्स्-क्रीडा-सहभागितस्याः निर्माणाय आह्वानम् अकरोत्। सः क्रीडकानां प्रशिक्षकानां च आदानप्रदानम्, संयुक्तस्पर्धाः, क्रीडा-विज्ञानस्य अथ तन्त्रज्ञानस्य च आदानप्रदानं प्रस्तावितवान्। डॉ. माण्डविया अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतं स्वस्य क्रीडा-पर्यावरणव्यवस्थां परिवर्तयन् अस्ति एवञ्च क्रीडाङ्गणात् मञ्चपर्यन्तम् अवसरान् कल्पयति। सः पैरा-स्पो इत्यस्य प्रोत्साहनाय, क्रीडासु महिलानां सहभागित्वं वर्धयितुं च भारतस्य प्रयत्नान् अपि प्रतिपादितवान्।

## ईरान्-देशेन तेहरान-विरुद्धे अमेरिकीय-आर्थिक-अभियानेन सम्मिलितुं प्रतिवेशि-राष्ट्राणां कृते भागं न ग्रहीतुं सञ्चेतनां अयच्छत्



ईरानदेशस्य सर्वोच्चराष्ट्रीयसुरक्षापरिषदः सचिवः मोहसेन रेजाई इत्याख्यः समीपवर्ति देशान् तेहराननगरस्य विरुद्धं अमेरिकादेशेन सञ्चाल्यमाने आर्थिक-अभियाने भागं न ग्रहीतुं सञ्चेतनां अयच्छत्। सः अवदत् यत् एतादृशे अभियाने सहभागिता कुर्वन् चेत् ईरानदेशः तान् देशान् शत्रुरूपेण मन्येत। आईआरआईबी-संस्थायै दत्ते साक्षात्कारे रेजाईवर्यः अवदत् यत् ईरानदेशः वृद्धिं न इच्छति, किन्तु यदि समीपवर्तिदेशाः वाशिङ्गटनस्य आर्थिक भारोपायानां समर्थनं कुर्वन्ति, तर्हि तेहरानः प्रतिकारात्मकं कार्यं करिष्यति। सः अग्रे संचेतनां अयच्छत् यत् यदि क्षेत्रीयदेशाः अमेरिकादेशस्य आर्थिक अभियाने सम्मिलिताः भवन्ति, तर्हि ईरानदेशः फारस-खात्यातः होर्मुज-जलडमरूमध्याततः च तैलस्य निर्यातं निरोद्धुं शक्नोति। तस्य एषा मिणी अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्प-महोदयेन ईरानस्य विरुद्धं "आर्थिक-डी-डे" अभियानस्य घोषणानन्तरम् आगता। ट्रम्प-महोदयेन एतत् अभियानं "कस्यापि देशस्य विरुद्धम् अद्यावधि सञ्चालितेषु अभियानेषु सर्वाधिकविनाशकारी आर्थिक अभियानम्" इति वर्णितम्। सः अमेरिकादेशस्य मित्रदेशान् तेहरानं एकाकिनं कर्तुं वाशिङ्गटनस्य समर्थनं कर्तुमपि आह्वानं कृतवान्।

## राष्ट्रियान्तरिक्षदिवसावसरे केन्द्रीयविज्ञानप्रौद्योगिकी-राज्यमन्त्री डॉ. जितेन्द्रसिंहः चन्द्रयान-3 इत्यस्य ऐतिहासिकसफलतायाः स्मरणं कृतवान्



राष्ट्रियान्तरिक्षदिवसावसरे केन्द्रीयविज्ञानप्रौद्योगिकी-राज्यमन्त्री डॉ. जितेन्द्रसिंहः चन्द्रयान-३ इत्यस्य ऐतिहासिकसफलतायाः स्मरणं कृतवान्। सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे डॉ. सिंहः त्रयोविंशत्यधिक-द्विसहस्र-तमवर्षस्य अगस्तमासस्य त्रयोविंशतिदिनाङ्के घटितं तत् ऐतिहासिकं क्षणं स्मृतवान्, यदा चन्द्रयान-३ सफलतया चन्द्रस्य दक्षिणध्रुवीयप्रदेशे अवतरितम्। सः उक्तवान् यत् अनया उपलब्धिनां भारतं विश्वस्य प्रमुखान्तरिक्षदेशेषु स्थानं प्राप्तवान्। सः भारतीयवैज्ञानिकानां योगदानस्य प्रशंसाम् अपि अकरोत्।

# गार्डन-रीच-शिपबिल्डर्स-एण्ड-इञ्जिनियर्स इति संस्था भविष्यकाले पोतनिर्माणक्षेत्रे अग्रणीभूमिकां निर्वोढुं शक्नोति - राजनाथसिंहः



रक्षामन्त्री श्रीराजनाथसिंहः युद्धपोतानां, समुद्रीययानानां तथा अन्यसम्बद्धक्षेत्राणां निर्माण आत्मनिर्भरतायाः आवश्यकता सबलं प्रतिपादितवान्। सः देशस्य सुरक्षायै आत्मनिर्भरताम् अत्यन्तं महत्त्वपूर्णां प्रतिपादितवान् । भारतं भविष्यस्य पोतनिर्माणकेन्द्रं कर्तुं अस्मिन् क्षेत्रे उच्चगुणवत्तायुक्तानां अनुरक्षणसेवानाम् आवश्यकता अस्ति इति सः प्रतिपादितवान्। कोलकातानगरे गार्डन रीच् शिपबिल्डर्स एण्ड् इञ्जिनियर्स (जी. आर्. एस्.ई.) (वाई.आई. एल्.) इत्येतयोः संस्थयोः प्रायः त्रिसहस्रचतुःशतको रूप्यकाणां पञ्चपरियोजनानां भूमिपूजनसमारोहे सम्बोधनं कुर्वन् श्रीसिंहः अवदत् यत् आत्मनिर्भरता वर्तमानसमयस्य आवश्यकता अस्ति। सः अवदत् यत् जी.आर्.एस्.ई. संस्था भविष्यकाले पोतनिर्माणक्षेत्रे अग्रणीभूमिकां निर्वोढुं शक्नोति। सः इदमपि सूचितवान् यत् जी.आर्.एस्.ई. संस्था जर्मनीदेशाय मालवाहकपोतस्य निर्माणं कुर्वती अस्ति। असौ अवदत् यत् विश्वे निर्यात्यमानानां रक्षोत्पादानां गुणवत्तायाः सुनिश्चितीकरणे तथा समये वितरणे पूर्णं ध्यानं दातव्यम्। सः सूचितवान् यत् सशस्त्रबलानि अधुना स्वस्य रक्षावश्यकतानां पूर्तये स्वदेशीय उत्पादेषु निर्भराः सन्ति। श्रीसिंहः अवदत् यत् राज्यसर्वकारः आन्तरिकसुरक्षासम्बन्धे पूर्णं सहयोगं प्रददाति। सः आशां व्यक्तवान् यत् राज्यसर्वकारः नवीनपरियोजनानां शुभारम्भेन विकासस्य नवपुनर्जागरणस्य प्रारम्भाय पदक्षेपान् स्वीकरिष्यति। सः सूचितवान् यत् राज्यसर्वकारेण नवीनपरियोजनाभ्यः एकादशसहस्राणि परिमितं भूमिक्षेत्रं उपलब्धं कारितम् अस्ति। सः अवदत् यत् नवरत्न-कम्पनी जी.आर्.एस्.ई. लिमि इत्यनया संस्थया अधुना एव शताधिकाः पोताः निर्मिताः तथा प्रदत्ताः च सन्ति। मन्त्री सूचितवान् यत् वाई.आई.एल्. संस्था न केवलं पारम्परिकानि शस्त्राणि प्रददाति, अपितु अनुसन्धान-विकासकार्येष्वपि महत्त्वपूर्ण योगदानं ददाति ।

# आईसीएमआर इत्यनेन उक्तम्—देशे स्वाइन-फ्लू-रोगस्य कोऽपि नूतनः प्रभेदः नास्ति

भारतीय-चिकित्सा-अनुसन्धान-परिषदा (आई.सी.एम.आर.) स्पष्टीकृतं यत् एच1एन1-विषाणोः कस्यापि नूतनरूपस्य अभिज्ञानं न जातम्, अतः भयाशङ्कायाः किमपि कारणं नास्ति। वर्तमानकाले प्रसरमाणः इन्फ्लूएंजा-रोगः नूतनः नास्ति। आई.सी.एम.आर. इत्यस्य वरिष्ठवैज्ञानिकानाम् अनुसारम् अयम् २०२५ वर्षात् एव अस्ति।आई.सी.एम.आर. इत्यस्यानुसारम् एच1एन1-सहितः ऋतुकालीन-इन्फ्लूएंजा-रोगः अत्यन्तं सीमितः अस्ति। अस्य सामान्यलक्षणेषु ज्वरः, कासः, शिरोवेदना, शरीरस्य स्तब्धता च सन्ति, तथा च अधिकांशजनाः समुचितोपचारेण विश्रामेण च स्वस्थाः भवन्ति। परिषदा उक्तं यत् लघूनां बालकानाम्, वृद्धानां, रोगिणां च कृते अस्मात् रोगात् जटिलाः समस्याः उद्भवितुं शक्नुवन्ति। यदि एतानि लक्षणानि तीव्राणि भवेयुः, तर्हि चिकित्सकेन सह परामर्शः करणीयः।

आई.सी.एम.आर. इत्यनेन प्रतिपादितं यत् नियमितपर्यवेक्षणेन स्थितेः सूक्ष्मतया निरीक्षणं क्रियते तथा च जनस्वास्थ्यरक्षणार्थम् आवश्यकानि पदानि स्वीक्रियन्ते।

# विदेशमन्त्री एस. जयशङ्करः रूसदेशस्य द्विदिवसीययात्रायै मास्कोनगरं प्राप्तवान्




विदेशमन्त्री एस. जयशङ्करः रूसदेशस्य द्विदिवसीययात्रार्थं मास्कोनगरं सम्प्राप्तः। सः रूसदेशस्य उपप्रधानमन्त्रिणा डेनिस-मन्तुरोवेन सह व्यापारिक-आर्थिक-वैज्ञानिक-प्राविधिक-सांस्कृतिक-सहयोगस्य भारत-रूस-अन्तर्सरकारीय-आयोगस्य सप्तविंशतितमस्य (२७) अधिवेशनस्य सह-अध्यक्षतां करिष्यति। अस्मिन् समये डॉ. जयशङ्करः रूसदेशस्य विदेशमन्त्रिणा सर्गेई-लावरोवेन सह अपि मेलनं करिष्यति तथा च क्षेत्रीय-वैश्विक-विषयेषु स्वविचारान् प्रस्तौष्यति।

# एनजीटी-संस्थया गङ्गासंरक्षणनियमेषु परिवर्तने केन्द्रसर्वकारस्य उत्तरम् अन्विष्टम्




राष्ट्रियहरिताधिकरणेन (एन.जी.टी.) गङ्गानद्याः संरक्षणसम्बद्धेषु नियमेषु सम्प्रति कृते परिवर्तने एकां याचिकां शृण्वता केन्द्रसर्वकारात् उत्तरम् अन्विष्टम्। एन.जी.टी.-अध्यक्षस्य न्यायमूर्ति-प्रकाश-श्रीवास्तवस्य नेतृत्वे एकेन न्यायपीठेन अस्य मासस्य आरम्भे प्रकाशितायाः एकायाः अधिसूचनायाः संज्ञानं गृहीतम्। अधिसूचनायां कथितरूपेण नद्याः अस्याः सहायकनदीनां च क्षेत्रे निर्माणनिषिद्धक्षेत्रं निष्कासितम्। हरिताधिकरणस्य मतमस्ति यत् एतत् परिवर्तनं वर्तमानानां पर्यावरणनियमानाम् उल्लङ्घनम् अस्ति। अस्य विषयस्य अग्रिमा शुनवाई (विचारणा) २७ अक्टोबर्-दिनाङ्के भविष्यति।

# उपराष्ट्रपतिः, प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रियान्तरिक्षदिवसावसरे देशवासिभ्यः शुभकामनाः प्रदत्तवन्तौ




उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अथ प्रधानमन्त्री नरेन्द्रमोदी च राष्ट्रियान्तरिक्षदिवसावसरे देशवासिभ्यः शुभकामनाः प्रदत्तवन्तौ। सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे श्रीराधाकृष्णन उक्तवान् यत् अन्तरिक्षान्वेषणक्षेत्रे भारतस्य विशिष्टशेपलब्धयः देशस्य वैज्ञानिक-श्रेष्ठतायाः, नवोन्मेष-भावनायाः एवं ज्ञानस्य सीमाः च अग्रे नेतुं दृढसङ्कल्पस्य प्रमाणं सन्ति। असौ देशस्य वैज्ञानिकान्, अभियन्तृन् तथा नवोन्मेषकान् नत्वा उक्तवान् यत् तेषां समर्पणं राष्ट्रं निरन्तरं नूतनासु उन्नतिषु नयति। असौ देशस्य गगनयानम् सदृशानां महत्वाकाङ्क्षि-अभियानानाम् अपि उल्लेखं कृतवान्। तदनन्तरं प्रधानमन्त्री नरेन्द्रमोदी सामाजिकसञ्चारपनि एकं दृश्य-श्रव्य-सन्देशं प्रकाश्य उक्तवान् यत् नूतनवैश्विकव्यवस्थायां भारतं स्वस्य अन्तरिक्षक्षेत्रस्य निरन्तरं विस्तारं करोति। श्रीमोदी उक्तवान् यत् अद्य जेन-जी इति नवयुववर्ग-सम्बद्धाः अभियन्तारः, रूपाङ्कनकाराः, सङ्गणक-कार्यक्रम-लेखकाः अथ वैज्ञानिकाः च नवप्रौद्योगिकीनां निर्माणं कुर्वन्ति।

# ऋतुविभागेन छत्तीसगढस्य, ओडिशा-राज्यस्य, तटीय-आन्ध्र प्रदेशस्य च पृथक् पृथक् स्थानेषु अतिवृष्ट्यै नारङ्ग-वर्णपरा सञ्चेतना प्रदत्ता ऽस्ति

भारत-ऋतु-विभागेन छत्तीसगढ ओडिशा-तटीय-आन्ध्र प्रदेशानां पृथक् पृथक् स्थानेषु अतिवृष्ट्यै नारङ्गवर्णपरा पूर्वसञ्चेतना प्रदत्ता अस्ति। आई. एम्. डी. इत्यनेन अरुणाचलप्रदेश-असम-मेघालय-तटीय-कर्णाटक-पूर्वी-उत्तरप्रदेश-गाङ्गेय-पश्चिमबङ्गाल-झारखण्डानां पृथक् स्थानेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानितम्। अत्रान्तरे प्रातः राष्ट्रिय-राजधान्याः केषुचित् भागेषु मध्यमवर्षा जाता।

# नाथूला-गताध्वना कैलासमानसरोवरयात्रा समाप्ता, ४६४ भक्ताः सम्मिलिताः



सिक्किमराज्यस्य नाथूला-गताध्वना (दर्रेण) प्रचलन्ती कैलासमानसरोवरयात्रा सम्पूर्णा अभवत्। अस्य मार्गेण ४६४ तीर्थयात्रिभिः दशसु गणेषु यात्रा कृता। इयं यात्रा २० जून-दिनाङ्के आरब्धा आसीत् तथा च अन्तिमगणस्य गङ्गटोक-आगमनेन सह एव समाप्ता जाता। तीर्थयात्रिणः चीनदेशस्य तिब्बत-स्वायत्त-क्षेत्रे कैलासपर्वतस्य मानसरोवरझषस्य (सरोवरस्य) च यात्राम् अकुर्वन्।

# रिज-प्राङ्गणे प्रतिध्वनितं 'वन्दे मातरम्', जयरामठाकुरस्य नेतृत्त्वे भाजपा-विधायकैः कृतम् उपवेशन-प्रदर्शनम्



**हिमसंस्कृतवार्ताः- शिमला।**
'वन्दे मातरम्' राष्ट्रगानं चाधिकृत्य प्रवृत्ते राजनैतिकसङ्घर्षे काङ्ग्रेसदलस्य विरोधप्रदर्शनस्य प्रत्युत्तरं भारतीय- जनता- पक्षेण (भाजपा) उपवेशन-प्रदर्शनेन दत्तम्। रविवासरे भाजपा- विधायक- दलेन शिमलायाः ऐतिहासिके 'रिज' प्राङ्गणे महात्मागान्धी-महोदयस्य प्रतिमायाः सम्मुखे प्रायः सार्धैक-होरां (१.५ घण्टां) यावत् उपवेशन- प्रदर्शनं कृतम्।
विपक्षनेतुः जयरामठाकुरस्य नेतृत्त्वे भाजपा-विधायकैः अस्मिन् अवसरे सामूहिक-रूपेण 'वन्दे मातरम्' इत्यस्य राष्ट्रगीतस्य गानम् अपि विहितम्। उपवेशने विधायकैः सह महत्यां सङ्ख्यायां भाजपा-कार्यकर्तारः अपि उपस्थिताः आसन्। अस्मिन् सार्धैक-होरायाः काले भाजपा-विधायकैः देशभक्ति-गीतानि अपि गीतानि।
अस्मिन् अवसरे विपक्षनेत्रा जयरामठाकुरेण प्रोक्तं यत् 'वन्दे मातरम्' भारतस्य स्वातन्त्र्य-सङ्ग्रामस्य प्रेरणायाः असंख्य-स्वातन्त्र्य-सेनानीनां त्याग- बलिदानयोश्च प्रतीकं वर्तते। अनेनैव उद्घोषेण देशस्य वीर-क्रान्तिकारिभिः स्वातन्त्र्य- आन्दोलनाय नूतना ऊर्जा प्रदत्ता तथा च बहवः वीराः सहर्षम् उद्बन्धनरज्जुं चुम्बितवन्तः। एतादृशस्य राष्ट्रगीतस्य सम्मानेन सह कस्यापि प्रकारस्य सन्धिः न स्वीकर्तुं शक्यते। तेन उक्तं यत् भाजपा-विधायक-दलेन विधानसभायां केवलम् एतावान् एव आग्रहः कृतः आसीत् यत् सदने सम्पूर्णस्य 'वन्दे मातरम्' गीतस्य ससम्मानं गानं क्रियेत। सः आरोपम् अकरोत् यत् सदन- कार्यविधेः पूर्वं सज्जीकृते कार्यक्रमे 'वन्दे मातरम्' इत्यस्य उल्लेखः आसीत्, किन्तु पश्चात् सः निष्कासितः। भाजपा-दलेन सदनस्य अन्तः अयम् विषयः उत्थापितः, किन्तु सर्वकारेण सकारात्मक- पक्ष-स्वीकरणापेक्षया गतिरोधस्य स्थितिः उत्पादिता।

**१९३७ तमस्य वर्षस्य निर्णयस्य उल्लेखः**

जयरामठाकुरेण १९३७ तमे वर्षे काङ्ग्रेस-कार्यकारिणी- समित्याः उपवेशने सञ्जातस्य निर्णयस्य उल्लेखं कुर्वता प्रोक्तं यत् काङ्ग्रेस-दलेन 'वन्दे मातरम्' इत्यस्य केषाञ्चित् अंशानाम् एव स्वीकरणस्य निर्णयः कृतः आसीत्। तेन पक्षः कृतः यत् ६ अप्रैल १९३८ दिनाङ्के जवाहरलालनेहरु- महोदयेन मुहम्मद- अली- जिन्ना-महोदयाय लिखिते पत्रे अपि 'वन्दे मातरम्' सम्बन्धिनाम् आपत्तीनाम् उल्लेखः विहितः आसीत्।
तेन प्रोक्तं यत् अद्य स्वतन्त्रे भारते राष्ट्रगीतस्य सम्मानस्य प्रश्नः कस्यचित् राजनैतिक-दलस्य निर्णयापेक्षया राष्ट्रिय-भावनया सांविधानिक- व्यवस्थया च अनुसृत्य द्रष्टव्यः। काङ्ग्रेस- कार्यकारिणी-समित्याः कोऽपि निर्णयः देशस्य सांविधानिक-संस्थानां च उपरि भवितुं नार्हति। देशः संविधानेन संसदा च स्थापित-नियमानुसारेण प्रचलति, न तु कस्यचित् दलस्य आदेशेन। भाजपा-पक्षस्य स्पष्टं मतम् अस्ति यत् 'वन्दे मातरम्' प्रति पूर्णा श्रद्धा सम्मान-भावश्च भवेत्।
तेन उक्तं यत् अस्मिन् विषये स्पष्ट-सन्देश-प्रदानाय सदनस्य अवकाशदिवसे महात्मागान्धी- महोदयस्य प्रतिमायाः सम्मुखम् एकत्रिताः भूत्वा सामूहिकरूपेण 'वन्दे मातरम्' गीतस्य गानं कृतम्। एषः कार्यक्रमः प्रतीकात्मक-रूपेण अयमेव सन्देशं दातुं विहितः यत् राष्ट्रगीतस्य सम्मानेन सह किमपि सन्धिः न विधास्यते। अस्मिन् अवसरे विपिनसिंहपरमारः, बिक्रमठाकुरः, राकेशजमवालः, त्रिलोकजमवालः, सुधीरशर्मा, डॉ. जनकराजः, आशीषशर्मा, पवनकाजलः सहिताः भाजपा-विधायक- दलस्य सदस्याः दलस्य शताधिकाः कार्यकर्तारश्च उपस्थिताः आसन्।

## देशभक्ति-रङ्गेण रञ्जितं 'रिज'-प्राङ्गणम्

उपवेशनकाले पूर्व-भाजपा-प्रदेशाध्यक्षः सतपालसिंहसत्ती 'रंग दे बसंती चोला' सहितानि देशभक्ति-गीतानि श्रावयित्वा कार्यकर्तृषु उत्साहम् अजनयत्। कार्यक्रमे उपस्थिताः भाजपाविधायकाः कार्यकर्तारश्च महता उत्साहेन देशभक्तिगीतेषु सम्मिलिताः अभवन्, समग्रं 'रिज' प्राङ्गणं च राष्ट्रभक्ति-घोषैः गीतैश्च प्रतिध्वनितम् अभवत्।

# हिमाचले विद्युत्-वाहनानां वेगः वर्धिष्यते; १२२ कोटिरूप्यकैः ८० स्थानेषु निर्मीयन्ते ऊर्जा- पूरण- केन्द्राणि



हिमसंस्कृतवार्ताः- शिमला।
हिमाचल- पथ- परिवहननिगमः प्रदेशे विद्युत्-सञ्चालित- लोकयानानां सञ्चालनाय आवश्यक-ऊर्जापूरण-संरचनां सुदृढां करोति। अस्य अन्तर्गतं १२२ कोटि-रूप्यकाणां व्ययेन प्रदेशस्य ८० स्थानेषु विद्युत्- ऊर्जापूरण- केन्द्राणि स्थाप्यन्ते। एतेषु ३४ स्थानेषु ऊर्जा-पूरण-केन्द्राणि स्थापितानि सन्ति, यदा च २१ स्थानेषु आगामिनि एकस्मिन् मासे एतानि स्थापयिष्यन्ते। अवशिष्टेषु २५ स्थानेषु ऊर्जा-पूरणकेन्द्राणां संस्थापन-प्रक्रिया प्रचलन्ती वर्तते।
एषा सूचना उप-मुख्यमन्त्री मुकेश-अग्निहोत्री अद्य हिमाचल-पथ-परिवहन-निगमस्य अधिकारिभिः सह समायोजितायाः समीक्षा-गोष्ठ्याः अध्यक्षतां कुर्वन् प्रददत्। सः न्यवेदयत् यत् एतानि ऊर्जा-पूरणकेन्द्राणि निगमस्य यानस्थानकेषु कर्मशालासु च स्थाप्यन्ते। अनेन विविध-मार्गेषु प्रचलन्तीनां विद्युत्-वाहनानां कृते ऊर्जा-पूरण-सुविधा प्राप्स्यते तेषां सञ्चालनं च गतिं लप्स्यते।

## पर्यावरण-अनुकूल-यातायात-व्यवस्था

मुकेश-अग्निहोत्री अवदत् यत् विद्युत्-वाहनानां सहैव तेषाम् ऊर्जा-पूरण-संरचनायाः विस्तारः प्रदेशे आधुनिक- सुलभ- पर्यावरणानुकूल- सार्वजनिक-परिवहन-व्यवस्थायाः सुदृढीकरणस्य दिशि एकं महत्त्वपूर्णं पदमस्ति। निगमः विद्युत्- वाहनानां सञ्चालनाय आवश्यकीः सुविधाः क्रमेण विकसयति, येन यात्रिभ्यः उत्तमा आधुनिका च परिवहन-सुविधा प्रदीयेत।
तेन विज्ञापितं यत् प्रदेशे ८० स्थानेषु आहत्य ९९ ऊर्जा-पूरण-बिन्दवः स्थाप्यन्ते। एतेषु १८० किलोवाट-क्षमतायुक्तानि द्रुत-पूरक-यन्त्राणि संयोज्यन्ते। सः अवदत् यत् एतानि केन्द्राणि केवलं बृहत्-नगरेषु एव सीमितानि न सन्ति, अपि तु निगमस्य विविधासु कर्मशालासु यान-स्थानकेषु च स्थाप्यन्ते। भविष्ये यत्र कुत्रापि आवश्यकता भविष्यति, तत्र एतादृशानि केन्द्राणि स्थापयिष्यन्ते।

## ईन्धन-व्यये महती न्यूनता

उपमुख्यमन्त्री न्यवेदयत् यत् निगमस्य गणे समाविष्टानि २९७ विद्युत्-वाहनानि दीर्घ- लघु- मार्गेषु साफल्येन सञ्चाल्यन्ते। विद्युत्-वाहनानां सञ्चालनेन निगमस्य प्रति-किलोमीटर् इन्धन-व्यये प्रायः १५ तः १६ रूप्यकाणां रक्षणं भवति, येन निगमस्य परिचालन-व्यय-न्यूनीकरणे साहाय्यं लभ्यते। सः अवदत् यत् विद्युत्-वाहनानां सामान्यतः एकवारम् ऊर्जा-पूरणानन्तरं प्रायः १८० किलोमीटर-पर्यन्तं चलन-क्षमता वर्तते। तथापि, हरोलीतः चण्डीगढपर्यन्तं प्रायः २७० किलोमीटर- दीर्घमार्गे विद्युत्-यानम् एकवारम् ऊर्जा-पूरणेनैव साफल्येन प्रचलति। तथैव शिमला- चण्डीगढ- शिमलामार्गे प्रायः २५० किलोमीटर- दीर्घ- यात्रायामपि यानम् अवशिष्टया २५ प्रतिशत- विद्युत्- कोश- ऊर्जया सह यात्रां सम्पूर्णं करोति।

## सर्वदा गुलज़ारः एव न भवितुम् अर्हति! 😆

**(हास्यकणिका- विदुषी)**

भूमौ धूलौ पतितानि ...... कतिपय- पदचिह्नानि।
चायपेयस्य ...... द्वे शुष्के पात्रे।
निःशब्दानि...... सूपस्य शुष्कतां पात्राणि।
शुष्कैः चायपर्णैः परिपूर्णा ...... एका निर्जीवा चाय-शोधनी। अर्थात्- “अद्य परिचारिका न आगता।” 😆



# मुख्यमन्त्री सुक्खू-महोदयस्य वाराणस्यां पर्यटन- सञ्चालकेभ्यः विशेष-आग्रहः- पर्यटकेभ्यः दर्शयन्तु हिमाचलस्य अस्पृष्टानि पर्यटनस्थलानि



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः रविवासरे वाराणस्याम् आयोजिते 'भारतीय- उपाहारगृह- भोजनालय- सङ्घस्य' षट्पञ्चाशत्तमे (५६) वार्षिक- अधिवेशने भागं स्वीकृतवान्। अस्मिन् अवसरे सः समग्र-देशात् आगतेभ्यः उपाहारगृह-स्वामिभ्यः, यात्रा-प्रतिनिधिभ्यः (ट्रैवल-एजेण्ट), पर्यटन- सञ्चालकेभ्यः (टूर-ऑपरेटर), पर्यटन-उद्योगेन सम्बद्धेभ्यः अन्य-प्रतिनिधिभ्यश्च आग्रहम् अकरोत् यत् ते देश-विदेशानां पर्यटकान् हिमाचलम् आगन्तुं प्रेरयन्तु, स्व-यात्रा-सञ्चिकायुक्तेषु (टूर- पैकेज) राज्यस्य नूतनानि अस्पृष्टानि च पर्यटन- स्थलानि अपि समावेशयन्तु।

तेन स्व-सम्बोधने प्रोक्तं यत् हिमाचलस्य शान्ताः सुरक्षिताश्च उपत्यकाः, शुद्धा वायुः, निर्मलं जलम्, हिमाच्छादिताः पर्वताः, हरित-वनानि, समृद्धा सांस्कृतिक-परम्परा, ग्रामाणां सरला जीवन-शैली च एतं देश-विदेशयोः पर्यटकानां मध्ये विशिष्टां प्रतिष्ठां प्रददति। अद्यतनः पर्यटकः केवलं पारम्परिक-पर्यटन-स्थलेषु सीमितः स्थातुं नेच्छति, अपि तु सः शान्तिं, प्रकृतिं, स्थानीय-संस्कृतिम्, स्वास्थ्य-संवर्धनं, प्रामाणिकम् अनुभवं स्थानीय-जनैः सह सम्बद्धतां च प्राथमिकतां यच्छति। हिमाचले एताः सर्वाः नूतनाः पर्यटन- आवश्यकताः पूरयितुं सामर्थ्यं वर्तते।

सः अवदत् यत् मार्ग- विद्युत्- जल- सङ्गणकीय- सञ्चार- माध्यमानां सम्बद्धतायां संवर्धनेन राज्यस्य सुदूरक्षेत्राणां पर्यटनस्थलानि अपि सुगमानि संजातानि सन्ति। राज्यसर्वकारः पर्यटकान् हिमाचलस्य अस्पृष्टक्षेत्रैः, स्थानीयसंस्कृत्या, परम्पराभिः, जीवनशैल्या च साक्षात् परिचाययितुम् अनुभव-आधारित-पर्यटनं संवर्धयति। अनेन सहैव सञ्चारीपर्यटनं सप्ताहन्त-पर्यटनं च अपि प्रोत्साह्यते।

### महिलानां कृते 'शी-ट्रैवल'-नीतेः सज्जीकरणम्

मुख्यमन्त्रिणा प्रोक्तं यत् महिलानां कृते हिमाचल प्रदेशं सुरक्षितं स्वागतयोग्यं च पर्यटन- गन्तव्यं विधातुं 'शी ट्रैवल' नीतिः सज्जीक्रियते। तथैव सर्वकारः महिलाभ्यः गृहवाससुविधायाः (होमस्टे), स्थानीय- खाद्य-व्यापारस्य, हस्तशिल्पस्य, स्थानीय- उत्पादानां पर्यटन- सम्बद्धानां नूतन- उद्यमानां च माध्यमेन वृत्ति-स्वरोजगारयोः अवसरान् उपस्थापयितुं महिला-आधारित-पर्यटन-उद्यमिताम् अपि संवर्धयति।

मुख्यमन्त्री न्यवेदयत् यत् राज्य-सर्वकारः पर्यटन-संरचनायाः सुदृढीकरणे विशेषध्यानं यच्छति। काङ्गड़ा-विमानपत्तने विस्तार-प्रक्रिया प्रारब्धा, अस्य परितः 'विमान-नगरम्' (एयरोसिटी) विकसयितुं योजना वर्तते। काङ्गड़ामण्डलं प्रदेशस्य पर्यटनराजधानीरूपेण विकस्यते। एतदतिरिच्य प्रत्येकस्मिन् मण्डलमुख्यालये तत्समीपे वा हेलिकॉप्टरस्थानकं निर्मातुं निर्णयः स्वीकृतः। अनेन न केवलं पर्यटनार्थं वायुसम्पर्कः सुदृढः भविष्यति, अपि तु आपदाप्रबन्धने, आपत्-कालीने चिकित्सासञ्चारे, सुदूरक्षेत्राणां सम्बद्धतायां चापि साहाय्यं लप्स्यते।

### हिमाचले साहसिक-पर्यटनस्य अनन्ताः सम्भावनाः

मुख्यमन्त्रिणा प्रोक्तं यत् हिमाचले साहसिक-पर्यटनस्य अपाराः सम्भावनाः सन्ति। अत्र पद-यात्रा (ट्रेकिङ्ग), हिम-क्रीडा (स्कीइङ्ग), आकाश- यानक्रीडा (पैराग्लाइडिङ्ग), नदी- तरण- क्रीडा (रिवर-राफ्टिङ्ग), पर्वतारोहणम्, शिबिरस्थापनं (कैम्पिङ्ग), पर्वत-द्विचक्रिका- चालनं जल-क्रीडाश्च इत्यादयः गतिविधयः प्रोत्साहयितुं शक्यन्ते। 'बीड़-बिलिङ्ग' क्षेत्रेण हिमाचलप्रदेशाय विश्वस्य साहसिक- पर्यटन- मानचित्रे विशिष्टा प्रतिष्ठा प्रदत्ता।

तेन उक्तं यत् हिमाचलं धार्मिक- आध्यात्मिक-पर्यटन- दृष्ट्या अपि समृद्धः वर्तते। राज्यस्य प्रमुखाः शक्तिपीठाः, ऐतिहासिकाः देवालयाः, बौद्धविहाराः, गुरुद्वाराश्च देश-विदेशात् महत्यां सङ्ख्यायां भक्तान् पर्यटकांश्च आकर्षयन्ति।

### जुलाईमासं यावत् १.०६ कोटि-पर्यटकाः सम्प्राप्ताः

मुख्यमन्त्री सुक्खू-महोदयः न्यवेदयत् यत् २०२५ तमे वर्षे जनवरी-तः दिसम्बर-पर्यन्तं हिमाचले ३.११ कोटि-पर्यटकाः सम्प्राप्ताः, येषु १.६६ कोटि-धार्मिक-पर्यटकाः सम्मिलिताः आसन्। २०२६ वर्षस्य जुलाईमासं यावत् १.०६ कोटि-पर्यटकाः प्रदेशस्य भ्रमणं कृतवन्तः।

तेन उपाहारगृह-आतिथ्य-उद्योगेन, यात्रा-प्रतिनिधिभिः, पर्यटनसञ्चालकैः सर्वैश्च सम्बद्धपक्षैः सह हिमाचलस्य पर्यटन-सामर्थ्यं संवर्धयितुं राज्यसर्वकारेण सह मिलित्वा कार्यं कर्तुम् आह्वानं कृतम्।

## संसद-सदस्यः अनुरागठाकुरः अवदत्- हिमाचले राहुल- सोनिया- प्रियङ्का- नाम्ना उपकरस्य आरोपणस्य परिस्थितिः आगमिष्यति



**हिमसंस्कृतवार्ताः- धर्मशाला।** पूर्व-केन्द्रीयमन्त्री हमीरपुर-लोकसभाक्षेत्रस्य संसद- सदस्यश्च अनुरागसिंहठाकुरः रविवासरे धर्मशालायाम् आयोजिते भारतीय-जनतापक्षस्य (भाजपा) भूतपूर्व-कर्मचारिप्रकोष्ठस्य मण्डलसम्मेलने काङ्ग्रेस-सर्वकारस्य उपरि तीक्ष्णं प्रहारम् अकरोत्। सः तैल-इन्धनयोः (पेट्रोल- डीजलयोः) उपरि उपकरस्य वर्धनम् अधिकृत्य व्यङ्ग्यं कुर्वन् अवदत् यत् हिमाचलप्रदेशे सः दिवसः दूरे नास्ति, यदा राहुल गान्धी, सोनिया गान्धी, प्रियङ्का गान्धी इत्येतेषां नाम्ना राज्यसर्वकारः उपकरस्य सङ्ग्रहणं प्रारप्स्यते। अनुरागठाकुरः प्रोक्तवान् यत् राहुल गान्धी हिमाचले शीघ्रतया धनदानस्य प्रतिज्ञां कृतवान् आसीत्, किन्तु काङ्ग्रेससर्वकारेण प्रदेशस्य समग्रव्यवस्था एव जर्जरिता कृता। अधुना जनता काङ्ग्रेसदलं शीघ्रातिशीघ्रं सत्तायाः बहिः कर्तुं निर्णयं विधास्यति। तेन आरोपः कृतः यत् प्रदेशे 'लुण्ठनयुक्ता' सर्वकारव्यवस्था प्रचलन्ती वर्तते।

### निवृत्ति-वेतन-भोक्तॄणां कर्मचारिणां च विषयाः लम्बिताः

संसद-सदस्येन प्रोक्तं यत् प्रदेशस्य निवृत्ति- वेतन-भोक्तॄणां १५ प्रतिशतं महार्घतावृत्तिः (DA) तथा च २०१६ वर्षस्य वित्तीय-लाभाः लम्बिताः सन्ति। हिमाचल- पथपरिवहन- निगम- सहितेषु विविध-मण्डलेषु निगमेषु च कर्मचारिणां बहवः विषयाः सर्वकारस्य पार्श्वे अनिर्णीताः सन्ति। तेन उक्तं यत् निवृत्ति-वेतनं न काचित् भिक्षा, अपि तु पूर्व-कर्मचारिणाम् अधिकारः सम्मानश्च वर्तते। भाजपापक्षः कर्मचारिणां निवृत्ति-वेतन-भोक्तॄणां च याचनानां कृते तैः सह दृढतया तिष्ठति।

तेन काङ्ग्रेसदलस्य पञ्च- लक्ष- वृत्ति- प्रदान- सहितेषु निर्वाचनीयेषु वाग्दानेषु अपि प्रश्नाः उत्थापिताः। तेन उक्तं यत् चतुर्णां वर्षाणां वाग्दानानां कार्याणां च गणना जनतायै स्मारयिष्यते।

अनुरागठाकुरेण आरोपः आरोपितः यत् सर्वकारस्य विरुद्धं स्वरम् उत्थापयतां जनानां मुख-पिधानस्य यत्नः क्रियते। सः सञ्चार-माध्यमानां सामाजिक-कार्यकर्तॄणां च उपरि प्रभाव-स्थापनस्य आरोपं कुर्वन् अवदत् यत् प्रदेशे विधि-व्यवस्थायाः स्थितिः शोचनीया वर्तते। तेन प्रोक्तं यत् केन्द्रस्य नरेन्द्रमोदीसर्वकारेण 'एक-पदं, समान- निवृत्ति-वेतनम्' प्रवर्त्य निवृत्ति-वेतन-न्यायालयाः प्रारब्धाः। सङ्गणकीय- जीवनप्रमाणपत्रैः अन्तर्जाल- निवृत्ति-वेतन- सुविधाभिश्च वृद्धाः सान्त्वनां प्राप्तवन्तः। सः आश्वासितवान् यत् भाजपा- सर्वकारस्य निर्माणे सति कर्मचारिणां निवृत्ति-वेतन-भोक्तॄणां च विषयाः प्राथमिकतया पूरयिष्यन्ते।

अस्मिन् समये पूर्वमन्त्री सरवीणचौधरी अपि सर्वकारेण सह अधिकारिणां कर्मचारिणां च प्रति अनुचित-व्यवहारस्य विकास-कार्याणां स्तम्भनस्य च आरोपम् अकरोत्। पूर्व-विधायकः अरुणमेहरा- कूका अवदत् यत् सर्वकारेण पूर्व-कर्मचारिणां योगदानं विस्मृतम्।

तत्रैव राष्ट्रिय-कर्मचारि-सङ्घस्य राष्ट्रिय-उपाध्यक्षः पूर्वसैनिक- प्रकोष्ठस्य राज्यसंयोजकः घनश्याम शर्मा प्रोक्तवान् यत् काङ्ग्रेससर्वकारस्य पञ्चचत्वारिंशत्-मासानां कार्यपद्धतौ आत्मचिन्तनस्य आवश्यकता वर्तते। तेन उक्तं यत् निवृत्ति-वेतन-भोक्तारः मार्गम् अवतरितुं विवशाः क्रियन्ते, १५ प्रतिशतं महार्घतावृत्तिः अवशिष्ट- राशि- सहिताः बह्व्यः याचनाः लम्बिताः सन्ति।

अस्मिन् सम्मेलने पूर्व-विधायकः विशालनैहरिया, भाजपा-मण्डल-अध्यक्षः सचिनठाकुरः, प्रदेश-प्रवक्ता राकेशशर्मा, सह-माध्यम-प्रभारी विश्वचक्षुः सहिताः अन्ये नेतारः उपस्थिताः आसन्।

# हिमाचल राजकीय संस्कृत शिक्षक परिषदः जनपद हमीरपुरस्य उपवेशनं सम्पन्नम्



- **पञ्चविंशतिः अगस्ततः एकत्रिंशत् अगस्तं यावत् संस्कृत सप्ताहः आचरिष्यते, विभिन्नानां गतिविधीनां प्रतियोगितानां च आयोजनं भविष्यति**

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा, हमीरपुरम्।

हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषदः जनपद हमीरपुरस्य उपवेशनम् अद्य राजकीय- वरिष्ठ- माध्यमिक- विद्यालये (बाल) हमीरपुरे जनपदाध्यक्षस्य आचार्य- नरेशमलोटिया महोदयस्य अध्यक्षतायां सम्पन्नम्। उपवेशने जनपदस्य पञ्चानाम् अपि खण्डानां कार्यकारिणीनां पदाधिकारिभिः सह विभिन्नविद्यालयेभ्यः आगताः संस्कृत- अध्यापकाः भागम् अगृह्णन्।उपवेशने आगामिनः संस्कृतसप्ताहस्य आयोजनं विषयकृत्य विशेषरूपेण चर्चा कृता। श्रावणी पूर्णिमायाः दिने अष्टाविंशतिः अगस्तदिनाङ्के एव संस्कृतदिवसः आचर्यते। अस्य एव उपलक्ष्ये श्रावणीपूर्णिमातः दिनत्रयं पूर्वं, दिनत्रयंपश्चात् च अर्थात् पञ्चविंशतिः अगस्ततः एकत्रिंशत् अगस्तं यावत् संस्कृतसप्ताहः आचरिष्यते। अस्मिन् काले विद्यालयस्तरेण सह एव जनपदस्तरे अपि विभिन्नाः संस्कृतगतिविधयः प्रतियोगिताः च आयोजयितुं निर्णयः गृहीतः, येन विद्यार्थिषु संस्कृतभाषां प्रति रुचिः, उत्साहः, अपनत्वस्य भावना च वर्धयितुं शक्येत। जनपदाध्यक्षः आचार्यः नरेशमलोटिया असूचयत् यत् संस्कृत सप्ताहस्य अवधौ संस्कृत सम्भाषणं, श्लोकपाठः, संस्कृतगीतं, प्रश्नोत्तरी, भाषणं, निबन्धलेखनं, योगसंस्कृतिम् इति एताभिः सह विभिन्नसंस्कृत- आधारिताः गतिविधयः प्रोत्साहयिष्यन्ते। सः अवदत् यत् संस्कृत सप्ताहः विद्यार्थिनः संस्कृतभाषायाः व्यावहारिक- सांस्कृतिकपक्षेण सह योजयितुं महत्त्वपूर्णः अवसरः अस्ति। उपवेशने संस्कृतगतिविधीनां, संस्कृतदिवसस्य, योगसंस्कृतेः, दीपकम् पुस्तकस्य, संस्कृतविषय- सम्बद्धानां पुस्तकानां, पाठ्यक्रमे विषय निर्धारणस्य, शिक्षा मण्डलस्य जालपुटे आवश्यकीं सूचनां नवीनीकर्तुं, क्रीडासु विभिन्न गतिविधिषु च संस्कृतशिक्षकाणां सहभागितायाः, संस्कृतप्रतियोगिताः अधिक व्यापकाः कर्तुम् इत्यादीनाम् अनेकमहत्त्वपूर्ण विषयाणाम् उपरि विचारविमर्शः कृतः। एतदतिरिक्तं शिक्षकाणां विद्यालयस्तरीय- विभागीयस्तरीयानां च विभिन्नसमस्यानां, सेवासम्बन्धिविषयाणां, पञ्चदश मई २००३ तः पूर्वं नियुक्तकर्मचारिभिः सम्बद्धस्य ओपीएस लाभविषयस्य उपरि अपि चर्चा कृता। उपवेशने शिक्षकाः स्व स्व विचारान् प्रस्तुतवन्तः। संस्कृतविषयस्य संस्कृतशिक्षकाणां च सम्बद्धप्रकरणानि उचितमञ्चे प्रभावपूर्ण रूपेण उत्थापनस्य आवश्यकतायाम् उपरि बलं दत्तवन्तः।

- **उपवेशने परिषदः पदाधिकारिणः खण्ड कार्यकारिणीनां सदस्याः च उपस्थिताः आसन्**

उपवेशने परिषदः जनपद महासचिवः स्वामी लालः, पूर्व राज्य महासचिवः डॉ अमितशर्मा, पूर्व- जनपदकोषाध्यक्षः पवनकुमारः, महिलाप्रधानः मीनाक्षी शर्मा, महिला संयोजिका रिम्पल रानी, जनपदसङ्गठनमन्त्री हिरवानी ठाकुरः इत्येतैः सह विभिन्नपदाधिकारिणः उपस्थिताः आसन्। खण्डस्तरात् खण्डहमीरपुरस्य प्रधानः ज्योति प्रकाश, महासचिवः राजेशकुमारः, कोषाध्यक्षः राजेशशर्मा, खण्ड बिझड़ी इत्यस्य प्रधानः डॉ मुनीशशर्मा, महासचिवः मिलनकुमारः, कोषाध्यक्षः राजेशकुमारः, खण्ड सुजानपुरस्य प्रधानः दिनेशकुमारः, महासचिवः राजकुमारः, खण्ड भोरञ्ज इत्यस्य प्रधानः स्वामीलालः, महासचिवः हिमीचन्दः, खण्ड नादौन इत्यस्य कोषाध्यक्षः पङ्कजकुमारः उपवेशने सहभागितां कृतवन्तः। एतदतिरिक्तं सदस्यः आकर्षशर्मा अपि उपस्थितः आसीत्।

*आचार्यः नरेशमलोटिया अवदत् यत् हिमाचल राजकीय- संस्कृत- शिक्षक- परिषदः संस्कृतभाषायाः प्रचारप्रसारस्य, विद्यार्थिषु संस्कृतं प्रति रुचिवर्धनस्य, संस्कृतशिक्षकाणां समस्यानां समाधानस्य कृते निरन्तरं प्रयासरता स्थास्यति। सः अवदत् यत् संस्कृतम् अस्माकं समृद्धज्ञान- परम्परायाः, संस्कृतेः, भारतीयचिन्तनस्य च आधारभूतभाषा अस्ति, एतां विद्यार्थिनां मध्ये रुचिकरव्यावहारिकरूपेण प्रेषणं सर्वेषां संस्कृतशिक्षकाणां सामूहिकदायित्वम् अस्ति।*

*सः संस्कृतसप्ताहस्य अवसरे जनपदस्य सर्वान् संस्कृतशिक्षकान् विद्यालयान् च अधिकाधिक- गतिविधयः आयोजयितुम् आह्वानं कृतवान्, उपवेशने उपस्थितानां सर्वेषां शिक्षकाणां पदाधिकारिणां च आभारं प्रकटयन् संस्कृतभाषायाः उत्थानस्य प्रचार प्रसारस्य च कृते सङ्गठितं भूत्वा कार्यं कर्तुम् आह्वानं कृतवान्।*

## नैमिषारण्ये संस्कृतसप्ताहस्य शुभारम्भः, क्रीडया संस्कृतशिक्षणम्

हिमसंस्कृतवार्ताः — उत्तरप्रदेशसंस्करणम्।

सीतापुरम्। संस्कृतभारती, सीतापुरस्य तत्त्वावधानेन नैमिषक्षेत्रस्थिते आत्मानन्दसंस्कृतशिक्षणसंस्थाने संस्कृतसप्ताहस्य शुभारम्भः उत्साहपूर्वकं सम्पन्नः। अस्मिन् अवसरे बटुकानां कृते विविधभाषाक्रीडानां माध्यमेन संस्कृतभाषायाः शिक्षणं सहजतया रोचकरूपेण च प्रदत्तम्। क्रीडामाध्यमेन संस्कृतशब्दानां प्रयोगं वाक्यरचनां च ज्ञात्वा विद्यार्थिषु संस्कृतभाषायाः प्रति विशेषः उत्साहः दृष्टः। कार्यक्रमे संस्कृतभारत्याः कार्यकर्ता अंशुगुप्तः विविधाः भाषाक्रीडाः आयोज्य बालकेभ्यः संस्कृतशब्दानां प्रयोगं तथा सरलवाक्यनिर्माणं च अभ्यासितवान्। तेन 'मम स्थाने संस्कृतम्' इति ध्येयवाक्यं प्रतिपाद्य संस्कृतसम्भाषणस्य शिक्षणं तथा दैनिकजीवने संस्कृतभाषायाः प्रयोगं च प्रति विशेषं बलं दत्तम्। अंशुगुप्तेन उक्तं यत् संस्कृतभारती १९ तमवर्षात् निरन्तरं संस्कृतभाषायाः पुनरुज्जीवनाय कार्यं कुर्वती अस्ति तथा देशस्य विभिन्नभागेषु जाति-धर्म-वर्गभेदान् अतिक्रम्य बहूनां जनानां संस्कृतसम्भाषणप्रशिक्षणे योगदानं दत्तवती। तेन प्रतिपादितं यत् क्रीडामाध्यमेन अधिगता भाषा बालकानां मनसि सहजतया स्थिरा भवति। एतेन संस्कृतभाषायाः प्रति विद्यमानः संकोचः दूरीभवति तथा भाषायाः प्रति स्वाभाविकः अनुरागः विकसितः भवति। कार्यक्रमे शिक्षणसंस्थायाः संस्थापकः आचार्यः सर्वेशशुक्लः अपि उपस्थितः आसीत्। स्वीयाशीर्वचने तेन बटुकान् सम्बोध्य उक्तं



यत् संस्कृतं केवलं भाषा नास्ति, अपितु भारतीयसंस्कृतेः संस्काराणां च आत्मा अस्ति। नैमिषारण्ये ऋषिमुनीनां पावनतपःस्थले संस्कृतसप्ताहस्य आयोजनं संस्कृतप्रचारस्य दिशि शुभं संकेतं वर्तते।

# श्रीमहाराजा- रणबीर- परिसरे संस्कृत- सप्ताह- महोत्सवस्य भव्यः शुभारम्भः






**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, जम्मू।** केंद्रीय- संस्कृत- विश्वविद्यालयस्य श्रीमहाराजा- रणबीरसिंह परिसरस्य, कोट-भलवाल, जम्मू इत्यत्र संस्कृतभाषायै, साहित्याय भारतीय- ज्ञान- परम्परायै च समर्पितस्य संस्कृत- सप्ताह- महोत्सवस्य भव्यः गरिमामयश्च शुभारम्भः अभवत्। महोत्सवस्यायोजनं 20 अगस्ततः 28 अगस्त 2026 पर्यन्तं क्रियमाणमस्ति। उद्घाटनसमारोहः प्रातः 10:30 वादने परिसरस्य वाणीविलाससभागारे आयोजितः।

उद्घाटनसमारोहस्याध्यक्षतां प्रो. सतीशकुमारकपूरः, निदेशकः, श्रीमहाराजारणबीरसिंह परिसरः। समारोहस्य मुख्यातिथिः पद्मश्री प्रो. विश्वमूर्तिशास्त्री आसीत्, सारस्वतातिथिः दर्शनविभागाध्यक्षः प्रो. महेशकुमारझा आसीत्।

कार्यक्रमस्य समन्वयकेन डॉ. प्रमोदकुमारशुक्लः इत्यनेन स्वागतभाषणं प्रस्तुतं सह- समन्वयकेन डॉ. रतनकुमारपाण्डेय इत्यनेन धन्यवादज्ञापनं कृतम्। कार्यक्रमस्य शुभारम्भः मुख्यातिथिना, अध्यक्षेन अन्यैः च गणमान्यैः अतिथिभिः दीपप्रज्वलनेन सह अभवत्। ततः वैदिकमङ्गलाचरणं प्रस्तुतं, परिसरस्य प्राविधिक- दलस्य सहयोगेन च सामूहिकरूपेण कुलगीतस्य गायनं कृतम्। तदनन्तरं स्वागतवक्तव्यं प्रस्तुतम्। उद्घाटनकार्यक्रमस्य निर्धारितरूपरेखायाम् अतिथिसम्मानं, प्रस्ताविकी, सारस्वतोद्बोधनं, मुख्यातिथेः सम्बोधनम्, अध्यक्षीयभाषणम्, धन्यवादज्ञापनं राष्ट्रगानं च इत्येते कार्यक्रमाः समाविष्टाः आसन्। डॉ. भास्करचटर्जी इत्यनेन प्रस्ताविकीं प्रस्तुत्य संस्कृत- सप्ताह- महोत्सवस्योद्देश्यानां, संस्कृतभाषायाः भारतीय- ज्ञान- परम्परायाश्च समृद्धभूमिकायाः विषये प्रकाशः प्रक्षिप्तः। ततः प्रो. महेशकुमारझा इत्यनेन सारस्वतोद्बोधनं प्रदत्तम्।

मुख्यातिथिना पद्मश्री प्रो. विश्वमूर्तिशास्त्री इत्यनेन स्वीयसम्बोधने संस्कृतभाषायाः गौरवं, तस्याः शाश्वतप्रासङ्गिकतां, भारतीयसंस्कृतौ ज्ञानपरम्परायां च तस्याः महत्त्वपूर्णं योगदानं रेखाङ्कितम्। तेन संस्कृतस्य अध्ययनाध्यापनयोः व्यापकत्वं वर्धयितुं, युवासमुदायं च संस्कृतस्य समृद्धपरम्परया सह संयोजयितुमावश्यकतायाः विषये बलं प्रदत्तम्।

अध्यक्षीयसम्बोधने प्रो. सतीशकुमारकपूरः, परिसरनिदेशकाः, इत्यनेन संस्कृतभाषायाः साहित्यस्य संरक्षणे संवर्धने च भारतीयज्ञानपरम्परां समकालीनसन्दर्भेषु अग्रे नेतुं च एतादृशानामायोजनानां भूमिका महत्त्वपूर्णा इति प्रतिपादितम्।समारोहे डॉ. संजयकुमारः, डॉ. गोपालवर्माः, डॉ. पुनीतागुप्ता, डॉ. श्वेतासूद, डॉ नीतूशर्मा,डॉ. प्रदीपकुमारमिश्रः, कमलकिशोरवर्यः, डॉ. प्रवीणकुमारः, डॉ. रेखामिश्र, डाॅ. स्नेहलता सहितं परिसरस्य अन्ये शिक्षकाः, अधिकारिणः कर्मचारिणश्च उपस्थिताः आसन्।

कार्यक्रमस्य सञ्चालनं राहुलमिश्रमहोदयेन कृतम्। अन्ते धन्यवादज्ञापनानन्तरं राष्ट्रगानेन सह उद्घाटनसमारोहस्य गरिमापूर्णं समापनम् अभवत्। संस्कृतसप्ताहमहोत्सव- 2026 इत्यस्य अन्तर्गतं 20 अगस्ततः 28 अगस्त 2026 पर्यन्तं विविधाः शैक्षणिकाः, सांस्कृतिकाः, संस्कृताधारिताः गतिविधयः आयोजयिष्यन्ते। अस्य महोत्सवस्य उद्देश्यं विद्यार्थिषु समाजे च संस्कृतभाषायाः, साहित्यस्य भारतीयज्ञानपरम्परायाश्च प्रति नूतनचेतनायाः रुचेः च निर्माणमस्ति।

# कृत्रिमबुद्धेः तीव्रप्रगतिः, किन्तु सुरक्षाव्यवस्थायाः मन्दगतिः






स्टैनफोर्ड-विश्वविद्यालयस्य 2026 AI Index इति प्रतिवेदने कृत्रिमबुद्धेः क्षेत्रे तीव्रप्रगतेः विषये महत्त्वपूर्णा चिन्ता व्यक्ता अस्ति। प्रतिवेदनानुसारं कृत्रिमबुद्धिसम्बद्धानां अभिलेखितानां घटनानां संख्या 2024 तमे वर्षे 233 आसीत्, या 2026 तमे वर्षे 362 पर्यन्तं वर्धिता। एतत् सूचयति यत् कृत्रिमबुद्धेः क्षमताः यथा शीघ्रं वर्धन्ते, तथा तस्याः सुरक्षा, उत्तरदायित्वं तथा नैतिकमूल्याङ्कनव्यवस्था न वर्धते। अद्य मुख्यः प्रश्नः केवलम् एषः नास्ति—"किं कृत्रिमबुद्धिः मानवस्य कार्याणि प्रतिस्थापयिष्यति?" अपितु अधिकमहत्त्वपूर्णः प्रश्नः अस्ति—"काः मानवसंस्थाः, के च मनुष्याः कृत्रिमबुद्धेः शक्तिं विवेकपूर्वकं, उत्तरदायित्वेन च नियन्त्रयिष्यन्ति तथा उपयोगं करिष्यन्ति?" कृत्रिमबुद्धिः जटिलसमस्यासु समाधानं दातुं, लेखनं कर्तुं, वैज्ञानिकानुसन्धाने साहाय्यं कर्तुं तथा विविधेषु क्षेत्रेषु मानवस्य कार्यक्षमतां वर्धयितुं समर्था भवति। किन्तु क्षमता एव प्रज्ञा न भवति। यन्त्रं निर्णयस्य विकल्पं दातुं शक्नोति, परन्तु तस्य निर्णयस्य नैतिकदायित्वं अन्ततः मानवस्य एव भवति। अतः भविष्ये केवलं "AI Literacy" अर्थात् कृत्रिमबुद्धेः प्रयोगज्ञानम् एव पर्याप्तं न भविष्यति। तेन सह विवेकः, आलोचनात्मकचिन्तनम्, नैतिकता, मानवीयमूल्यानि तथा उत्तरदायित्वबोधः अपि आवश्यकाः भविष्यन्ति। भारतीयज्ञानपरम्परायां विवेकः, संयमः, धर्मः तथा ज्ञानस्य उत्तरदायित्वपूर्णः उपयोगः विशेषतया प्रतिपादितः अस्ति। अतः आधुनिककृत्रिमबुद्धेः युगे प्रौद्योगिक्याः विकासेन सह मानवस्य विवेकस्य विकासः अपि आवश्यकः।

"भविष्यं तेषां न केवलं भविष्यति ये सर्वाधिकशक्तिशालिनीं कृत्रिमबुद्धिं निर्मास्यन्ति, अपितु तेषां भविष्यति ये तस्याः शक्तेः विवेकपूर्णम् उत्तरदायित्वयुक्तं च उपयोगं कर्तुं समर्थाः भविष्यन्ति।"

**देवेशविद्यार्थी 'संस्कृतभाषी'**

# दरभङ्गा-एम्स-निर्माणाय मृत्तिका-पूरण-कार्यं प्रारब्धुं निर्देशः; नियमानुसारं खनन-योजनां निर्मातुं मण्डलाधिकारिणा खननाधिकारिणे प्रदत्ताः निर्देशाः..

२३ अगस्त २०२६ राघव नाथ झा, हिमसंस्कृतवार्ता।

मण्डलाधिकारिणः कौशलकुमारस्य अध्यक्षतायां मण्डलान्तर्गतासु नदीषु सञ्चितस्य अवसादस्य (सिल्ट), पङ्कस्य, वालुकायाश्च सर्वेक्षणविषये समीक्षा-उपवेशनम् आयोजितम्। उपवेशने मण्डलस्य विविधासु नदीषु उपस्थितायाः पङ्क-वालुका-अवसादानां स्थितेः, तेषां सर्वेक्षणस्य नियमानुकूल-उपयोगस्य च सम्भावनानां विषये सविस्तरं विचार-विमर्शः जातः।

समीक्षाकाले मण्डलाधिकारिणा प्रतिपादितं यत् एम्स-निर्माणकार्ये मृत्तिका-पूरणाय आवश्यकी मृत्तिका यथा समुपलभ्येत, तदर्थं संवेदकेन नियमानुसारं खननाय योजना निर्मेया। सः आदिदेश यत् निर्मितां खननाय योजनां खनिज-विकास-अधिकारिणा अनुमोदितां



कारयित्वा भारतसर्वकारस्य पर्यावरण-वन-जलवायुपरिवर्तन-मन्त्रालयात् आवश्यकी पर्यावरणीय-स्वीकृतिः प्रापणीया। मण्डलाधिकारिणा स्पष्टः निर्देशः दत्तः यत् सर्वाः वैधानिकप्रक्रियाः अनुसृत्यैव कार्यम् आरभ्यताम्। मण्डलाधिकारिणा खनिज-विकास-अधिकारिणी सुमनकुमारी सम्बद्ध-विभागैः अधिकारिभिः च सह समन्वयं स्थापयित्वा कार्ये द्रुततां आनेतुं निर्दिष्टा। उपवेशनकाले बाढ-नियन्त्रण-प्रमण्डल-दरभङ्गायाः तथा बाढ-नियन्त्रण-प्रमण्डल-दरभङ्गा-१ इत्यस्य अभियन्तृभिः सम्बद्ध-नदीषु चिह्नितानां पङ्क-अवसादानां विषये वृत्तं प्रदत्तम्। मण्डलाधिकारिणा तेषां स्थलानाम् उपलभ्यमान-सामग्र्याः स्थितेः आवश्यकं सर्वेक्षणं मूल्याङ्कनं च कृत्वा खनिज-विकास-अधिकारिणं प्रति अग्रेतन-कार्यप्रक्रियाम् अनुष्ठातुं निर्देशः कृतः।

# आधुनिक-सुविधाभिः सह मिथिलायाः सांस्कृतिक-परिचयेन संवरिष्यते मधुबनी: NBCC-संस्थया सह विकासस्य नूतनः उपक्रमः



मधुबनी २३ अगस्त २०२६ राघव नाथ झा, हिमसंस्कृतवार्ता

मधुबनी-नगरस्य समग्रस्य, सुनियोजितस्य, आधुनिकस्य, शाश्वतस्य (सतत) च विकासस्य दिशि मण्डल-प्रशासनेन महत्त्वपूर्णः उपक्रमः प्रारभ्यते। अस्मिन्नेव क्रमे मधुबनी-मण्डलाधिकारिणा श्री-आनन्द-शर्मणा अद्य भारतसर्वकारस्य सार्वजनिकोपक्रमस्य NBCC (India) Limited इत्यस्याः संस्थायाः अधिकारिभिः सह महत्त्वपूर्णा मन्त्रणा कृता। NBCC-संस्था राज्ये नगरीय-आधारभूत-संरचनायाः विकासक्षेत्रे नगरविकास-एवं-आवास-विभागेन (UDHD), बिहारसर्वकारेण सह निकट-समन्वयेन कार्यं करोति। अस्मिन्नेव सन्दर्भे उपवेशनकाले मधुबनी-नगरस्य आधारभूत-संरचनायाः समुन्नयनम्, आधुनिक-नागरिक-सुविधानां विकासः तथा च मधुबनीयाः विशिष्ट-मिथिलाकला-सांस्कृतिक-परिचययोः पर्यटनेन स्थानिक-आर्थिक-विकासेन च सह संयोजनस्य सम्भावनासु सविस्तरं विचार-विमर्शः जातः।

उपवेशने विशेषरूपेण द्वयोः महत्त्वपूर्णयोः प्रस्तावयोः— एकीकृत-अवकर-प्रबन्धन-प्रणाल्याः (Integrated Waste Management System) तथा पीपीपी (PPP) प्रारूपे ‘मिथिला-कला-अनुभव-केन्द्रस्य’ (Mithila Arts Experience Centre) विकासस्य सम्भावनासु चर्चा संजाता। सहैव एतौ प्रस्तावौ प्राविधिक-आर्थिक-दृष्ट्या व्यवहार्य-परियोजना-रूपेण अग्रेसरयितुं विस्तृत-कार्ययोजनां निर्मातुं बलं दत्तम्।

## एकीकृत-अवकर-प्रबन्धनेन स्वच्छ-सुव्यवस्थित-मधुबन्याः दिशि उपक्रमः

उपवेशने मधुबनी-नगराय आधुनिकायाः एकीकृत-अवकर-प्रबन्धन-प्रणाल्याः विकासप्रस्तावे विस्तरेण विचारः जातः। अस्याः अन्तर्गतम् अवकरस्य सङ्ग्रहणं, परिवहनं, प्रसंस्करणम्, उपचारः, वैज्ञानिक-निस्तारणं चेति सर्वासां व्यवस्थानां समेकित-रूपेण विकासाय परिकल्पना विहिता। मण्डलाधिकारिणा प्रतिपादितं यत् नगरीय-स्वच्छता केवलम् अवकर-निष्कासनेन शुचित्वेन वा परिमिता भवितुं नार्हति। एषः विषयः सार्वजनिकास्वास्थ्येन, पर्यावरणसंरक्षणेन, श्रेष्ठनागरिकसुविधाभिः, नगरे जीवनस्य गुणवत्तया च साक्षात् सम्बद्धः वर्तते। अतः अवकरप्रबन्धनस्य सम्पूर्णा शृङ्खला वैज्ञानिका, प्रभावशालिनी, दीर्घावधिसङ्गता च व्यवस्थात्वेन विकसनीया।तेन NBCC-अधिकारिणः प्रति मधुबनी-नगरस्य स्थानीयपरिस्थितीः, वर्तमानानां भविष्यतः च आवश्यकताः ध्यात्वा व्यावहारिकं, दीर्घकालिकं, परिणामोन्मुखं च प्रारूपं निर्मातुं बलं दत्तम्।

## ‘मिथिला-कला-अनुभव-केन्द्रेण’ कलायै, पर्यटनाय, स्थानीय-अर्थव्यवस्थायाश्च लप्स्यते नूतनं मञ्चम्

मधुबनी-नगरस्य जगत्प्रसिद्धायाः मिथिला-चित्रकलायाः समृद्ध-सांस्कृतिक-परम्परायाश्च आधुनिकरूपेण बृहन्मञ्चं प्रदातुं पीपीपी (PPP - Public-Private Partnership) प्रारूपे ‘मिथिला-कला-अनुभव-केन्द्रम्’ विकसितुं प्रस्तावेऽपि विस्तरेण चर्चा संजाता।प्रस्तावितमिदं केन्द्रं केवलं प्रदर्शनस्थलरूपेण असीमित्वा मिथिलायाः कला-संस्कृतेः समग्रम् अनुभवं दातृकेन्द्ररूपेण विकसितुं सङ्कल्पितम्। अस्मिन् मिथिला-चित्रकलायाः अन्यासां पारम्परिक-कलानां च प्रदर्शनस्य, प्रचार-प्रसारस्य, विक्रयस्य च सुविधाः एकीकृत्य स्थापयितुं सम्भावनासु विचारः कृतः।

अनेन उपक्रमेण स्थानीय-कलाकारेभ्यः शिल्पकारेभ्यश्च स्वकलायाः प्रदर्शनाय श्रेष्ठापणैः (बाजार) सह संयोजनाय अवसरः लप्स्यते; सहैव पर्यटकेभ्यः कलाप्रेमिभ्यश्च मिथिलायाः विशिष्टायाः कला-सांस्कृतिक-परम्परायाः निकटेन दर्शनस्यानुभवस्य च सुयोगः प्राप्स्यते। मण्डलाधिकारिणा श्री-आनन्द-शर्मणा उक्तं यत् मधुबन्याः कला संस्कृतिश्च केवलं मण्डलस्य परिचायिका न, अपि तु स्थानीय-आर्थिक-विकासस्य एका महती क्षमता वर्तते। एतस्याः पर्यटनेन, आधुनिक-आपणेन, समुचित-सुविधाभिश्च संयोजनेन कलाकाराणां शिल्पकाराणां च कृते नूतनाः आर्थिक-अवसराः सृज्यन्ते। तेन एषा अवधारणा व्यावहारिकी, आर्थिकदृष्ट्या सङ्गता, दीर्घकालिकप्रारूपत्वेन च विकसनीयेति विशेषबलं दत्तम्।

आधुनिकतया सह मधुबन्याः विशिष्ट-परिचयस्य भविष्यति समावेशः

उपवेशनेऽस्मिन् विषये विशेषबलं दत्तं यत् मधुबन्याम् आधारभूत-संरचनायाः विकासः केवलं निर्माणकार्येषु सीमितः न स्यात्, अपि तु तस्य प्रत्यक्षः लाभः नागरिकाणां कृते भवेत् तथा च नगरस्य समग्र-गुणवत्तायां स्पष्टः सुधारः परिलक्षितः स्यात्।

मण्डलाधिकारिणा प्रतिपादितं यत् मधुबनी-नगरम् आधुनिकसुविधायुक्तं नगरं निर्मातुं तस्य मिथिलाकला, संस्कृतिः, स्थानीयपरिचयश्च विकासप्रक्रियायाः अभिन्नम् अङ्गं भवेयुः। आधुनिक-नगरीय-सुविधानां स्थानीय-सांस्कृतिक-धरोहरस्य च समन्वयेन मधुबनी-नगराय एकम् अद्वितीयं दीर्घकालिकं च नगरीय-विकास-प्रारूपं सज्जीकर्तुं शक्यते।

## डीपीआर (DPR) निर्माय परियोजनाः अग्रे सारयितुं बलं दत्तम्

मण्डलाधिकारिणा NBCC-अधिकारिणः प्रति प्रस्तावित-परियोजनानां प्राविधिक-वित्तीय-क्रियान्वयन-पक्षेषु सविस्तरं मूल्याङ्कनं कृत्वा विस्तृत-परियोजना-प्रतिवेदनं (DPR) निर्मातुं दिशि आवश्यकीं प्रक्रियां सम्पादयितुं निर्दिष्टम्, येन परियोजनाभ्यः व्यावहारिकं स्वरूपं दत्त्वा अग्रेतना प्रक्रिया शीघ्रं प्रारभ्येत।प्रस्ताविताः परियोजनाः नगरविकास-एवं-आवास-विभागेन (बिहारसर्वकारः) सम्बद्ध-संस्थाभिश्च सह आवश्यकसमन्वयेन क्रमिकरूपेण अग्रे सारयितुम् अपि आग्रहः कृतः।

मण्डलाधिकारिणा उक्तं यत् मण्डल-प्रशासनस्य लक्ष्यं तादृशीनां योजनानां विकासः अस्ति याः नागरिक-केन्द्रिताः, परिणामोन्मुखाः, आर्थिकदृष्ट्या व्यवहाराः, दीर्घकालिकाश्च स्युः। आधुनिक-आधारभूत-संरचनायाः विकासेन सह मधुबन्याः कला-सांस्कृतिक-धरोहरस्य संरक्षणं संवर्धनं च कृत्वा तासां पर्यटनेन आर्थिक-अवसरैश्च सह संयोजनं प्रशासनस्य प्राथमिकतासु अन्तर्भवति। विशेषज्ञ-संस्थानां सम्बद्ध-विभागानां च समन्वयेन प्रस्ताविताः परियोजनाः क्रमेण अग्रेसरीकृत्य मधुबनी-नगरं स्वच्छं, सुव्यवस्थितम्, आधुनिक-सुविधायुक्तं, स्वकीयां विशिष्ट-सांस्कृतिक-परिचयं संरक्षयत् नगरं कर्तुं निरन्तरं प्रयासाः विधास्यन्ते।उपवेशने NBCC-संस्थायाः उप-महाप्रबन्धकः (DGM) श्री-सुमन-कान्तः, परियोजना-प्रबन्धकः श्री-अभय-कुमारः, अपर-समाहर्ता, नगर-आयुक्तः (मधुबनी) तथा च सम्बद्धाः अधिकारिणः उपस्थिताः आसन्।

## संस्कृतं मधुरं सदा- ६६

## (लघुकथा)



हिमसंस्कृतवार्ता

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

समुद्रतीरे कस्मिंश्चित् स्थाने कश्चन टिट्टिभपक्षी पत्न्या सह निवसति स्म। कालक्रमेण तस्य पत्नी टिट्टिभी गर्भिणी जाता। सा पतिम् उक्तवती-

"स्वामिन्! मम प्रसवकालः सन्निहितः, तस्मात् किञ्चन सुखयुक्तं स्थानम् अन्विष्य मां तत्र स्थापय, तत्रैव अहम् अण्डविमोक्षणं करिष्यामि" इति। तदा टिट्टिभः अवदत्- "प्रिये! एषः समुद्रतीरमेव सुखपूर्णं स्थानमस्ति, तस्मात् अत्रैव भवत्या प्रसवः कार्यः" इति। ततः टिट्टिभी अकथयत्- "पूर्णिमावकाशे समुद्रस्य जलतरङ्गः अधिकः भवति, प्रकाण्डं मदमत्तगजमपि एषः आकृष्य नेतुं शक्नुयात्। अतः अन्यत् स्थानमेव मार्गय" इति। पत्न्याः वचनं विश्रुत्य टिट्टिभः किञ्चित् हसित्वा उक्तवान्- "अहो, प्रिये! मम सन्ततेः अपहरणस्य सामर्थ्यं समुद्रस्य कुतो वा स्यात्? अतः चिन्तारहिता भूत्वा भवती अत्रैव तिष्ठतु, सविश्वासञ्च अत्रैव गर्भविमोक्षणं करोतु" इति।

टिट्टिभस्य वचनं विश्रुत्य समुद्रः चिन्तितवान्- "अहो! एतस्य सामान्यस्य पक्षिणोऽपि कियान् गर्वः। एतस्य सामर्थ्यं कियदस्ति, अण्डानि अपहरामि चेत् एषः किं करिष्यति इत्यहमपि कुतूहलेन सर्वं पश्यानि" इति। ततः यथाकालं टिट्टिभी तत्रैव अण्डानि प्रसूतवती। एकदा सा अण्डानि नीडे परित्यज्य आहारसङ्ग्रहार्थम् क्वचित् गतवती आसीत्। तदा समुद्रोऽपि वेलाव्याजेन तस्याः अण्डानि अपहृतवान्। किञ्चित्समयानन्तरं यदा



टिट्टिभी प्रत्यागता तदा नीडे अण्डानि न दृष्टवती, नीडः शून्यः आसीत्। तदा सा विलापं कुर्वती, रुदती च पतिं शप्तवती- "त्वं महामूर्खोऽसि, तव वचनकारणतः मम सन्तानाः भ्रष्टाः। मया तु पूर्वं हि वारं वारम् उक्तमासीद् यत् सुखस्थानम् अन्वेषय इति, परन्तु त्वं न श्रुतवान्" इति। कथायाः तात्पर्यं यत् यः हितवचनं न शृणुयात् सः अवश्यं दुःखसमुद्रे निपतत्।

# कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य सीनेट्-सिण्डिकेट्-सदस्यस्य तथा जद(यू)-विधायकस्य श्रीविनयकुमारचौधरी-महोदयस्य प्रतोदपदे (सचेतकपदे) मनोनयनेन संस्कृतछात्रसमुदायेन प्रकटिता प्रसन्नता

**दरभङ्गा २३ अगस्त २०२६ राघव नाथ झा, हिमसंस्कृतवार्ता।**



कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य सीनेट्-सिण्डिकेट्-सदस्यस्य तथा जनतादल(यूनाइटेड)-दलस्य वरिष्ठविधायकस्य श्रीविनयकुमारचौधरी-महोदयस्य सचेतकपदे (प्रतोदपदे) मनोनीते सति विश्वविद्यालयस्य संस्कृतछात्र-छात्रासु महान् हर्षोल्लासः संजातः। अस्मिन् अवसरे शिक्षाप्रकोष्ठस्य मण्डलाध्यक्षः डॉ. अवनकुमाररायः, विश्वविद्यालयस्याध्यक्षः श्रीविश्वमोहनझा, छात्रनेता सन्तोषसिंहश्च प्रभृतिभिः बहुसंख्यकैः छात्रैः श्रीचौधरी-महोदयाय हार्दिकाभिनन्दनानि शुभाशयाश्च समर्पिताः, तस्य भव्यं स्वागतं सम्माननं च कृतम्।

कार्यक्रमस्य सुव्यवस्थितं संयोजनं विश्वविद्यालयस्याध्यक्षस्य श्रीविश्वमोहनझा-महोदयस्य कुशलनेतृत्वे संपन्नम्। सः समुपस्थितान् छात्रान् कार्यकर्तॄंश्च सम्बोध्य अवदत् यत्— "श्रीविनयकुमारचौधरी-महोदयस्य सचेतकपदे मनोनयनं न केवलं तस्य सुदीर्घराजनीतिक-सांगठनिकानुभवस्य सम्माननं वर्तते, अपितु संस्कृतशिक्षायाः कृते समग्रविश्वविद्यालयपरिवारस्य कृते च अतीव गौरवस्य विषयोऽस्ति।"

वक्तृभिः प्रतिपादितं यत् श्रीविनयकुमारचौधरी-महोदयः एकः अनुभवी जनप्रतिनिधिः, कुशलः संगठनकर्ता तथा शिक्षाजगता सह घनिष्ठतया संबद्धः व्यक्तित्ववान् अस्ति। कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालयस्य सीनेट्-सिण्डिकेट्-सदस्यरूपेण सः विश्वविद्यालयस्य शैक्षणिकोन्नतये, प्रशासनिकसुदृढीकरणाय, संस्कृतशिक्षायाः संवर्धनाय तथा छात्रहितसंबद्धविषयेभ्यः सततं सक्रियं योगदानं दत्तवान्।छात्रनेतारः अकथयन् यत् संस्कृतभाषां प्रति, भारतीयज्ञानपरम्परां प्रति च श्रीचौधरी-महोदयस्य संवेदनशीलता, संस्कृतच्छात्रेभ्यश्च तस्य आदरभावः तं छात्रसमुदाये विशेषरूपेण सम्मानितं करोति। विश्वविद्यालयस्य संस्कृतशिक्षायाश्च विषयेषु तस्य कर्मठतया छात्रैः सर्वदा सकारात्मकसहयोगस्य अपेक्षा कृता वर्तते। वक्तृभिः दृढविश्वासः प्रकटितः यत् सचेतकरूपेण तस्य कार्यकुशलता, संसदीय-अनुभवः, नेतृत्वक्षमता, दूरदर्शि-चिन्तनं च राज्यस्य विकासेन सहैव शिक्षायाः, संस्कृताध्ययनस्य तथा भारतीयज्ञानपरम्परायाः संरक्षणे संवर्धने च महत्त्वपूर्णं योगदानं दास्यति। अनेन सहैव संस्कृतविद्यार्थिनां समस्यानां समाधाने विश्वविद्यालयहितसंबद्धविषयाणां पुरस्करणायापि तस्य भूमिका महत्त्वपूर्णा भविष्यति।

कार्यक्रमे छात्र-छात्राभिः पुष्पमालाभिः अङ्गवस्त्रैश्च श्रीविनयकुमारचौधरी-महोदयस्य अभिनन्दनं कृत्वा नूतनदायित्वाय शुभाशयाः प्रकटीकृताः। समुपस्थितैः सर्वैः छात्रैः एकस्वरेण तस्य सफलस्य, यशस्विनः, जनकल्याणकारिणश्च कार्यकालस्य मङ्गलकामना कृता। अन्ते कार्यक्रमस्य संयोजकः विश्वविद्यालयस्याध्यक्षः श्रीविश्वमोहनझा-महोदयः समुपस्थितानां सर्वेषां छात्राणां सदस्यानां च प्रति आभारं प्रकटयन् अवदत् यत् संस्कृतविद्यार्थिनां पक्षतः कृतम् इदं सम्मानं केवलम् एकस्य व्यक्तेः अभिनन्दनं नास्ति, अपितु संस्कृतशिक्षायाः, संस्कृतविश्वविद्यालयस्य, समृद्धभारतीयज्ञानपरम्परायाश्च प्रति समादरस्य संपुष्टिः अस्ति।

# दरभङ्गा-रोसड़ा-खगड़िया चतुष्पथपंक्तिमार्गं सीतामढ़ी-पर्यन्तं विस्तारयितुं शीघ्रमेव उपक्रमः : संसद्-सदस्यः

## केन्द्रीय-राजमार्ग-राज्यमन्त्रिणा अजय-टमटा-महोदयेन सह संसद्-सदस्यस्य डॉ. गोपाल जी ठाकुरस्य मेलनम्; दरभङ्गा-नगरं चतुष्पथेन द्रुतमार्गेण (एक्सप्रेसवे) च योजयितुम् अनेकेषु प्रस्तावेषु चर्चा संजाता

**दरभङ्गा।२३ अगस्त २०२६ राघव नाथ झा, हिमसंस्कृतवार्ता।**

मिथिलाक्षेत्रे मार्ग-सम्पर्कं सुदृढं कर्तुं महती पहलः प्रारभ्यते। दरभङ्गा-रोसड़ा-खगड़िया चतुष्पथ-राष्ट्रिय-राजमार्ग-गलियारा दरभङ्गा-माध्यमेन सीतामढ़ी-पर्यन्तं विस्तारयितुं शीघ्रमेव प्रयासः क्रियते। दरभङ्गा-नगरस्य स्थानीयः संसद्-सदस्यः, लोकसभायां भाजपा-पक्षस्य सचेतकः डॉ. गोपाल जी ठाकुरः रविवासरे नवदेहलीस्थे कार्यालये केन्द्रीय-राजमार्ग-राज्यमन्त्रिणा अजय-टमटा-महोदयेन सह मेलनानन्तरं वार्तामिमां न्यवेदयत्।

संसद्-सदस्यः अवदत् यत् दरभङ्गा-नगरे विमानपत्तनम्, निर्माणाधीनम् एम्स-चिकित्सालयः, राष्ट्रियमखाना-अनुसन्धानकेन्द्रं चेति प्रमुखाः राष्ट्रियमहत्त्वपूर्णाः परियोजनाः वर्तन्ते। अतः दरभङ्गा-नगरं बिहारस्य चतुर्दिग्भिः सह श्रेष्ठमार्गसम्पर्केण योजयितुम् आवश्यकम् अस्ति। राष्ट्रियराजमार्गस्य (NH) राष्ट्रियराजमार्गप्राधिकरणस्य (NHAI) च माध्यमेन क्षेत्रे मार्गसंयोजनस्य विस्तारः क्रियते।

मेलनकाले संसद्-सदस्येन डॉ. ठाकुरेण



मिथिलापरम्परानुसारं पाग-वस्त्रेण अङ्गवस्त्रेण च केन्द्रीयमन्त्री सम्मानितः। सः अकथयत् यत् विकासविषये दरभङ्गा-नगरं राष्ट्रियमानचित्रे स्थापयितुं निरन्तरं प्रयासाः क्रियमाणाः सन्ति। एतत् मिथिलायाः सर्वाङ्गीणविकासाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे एनडीए-सर्वकारस्य दृढप्रतिबद्धतायाः प्रमाणम् अस्ति।

### विमानपत्तन-सुपौल-दरभङ्गा-राष्ट्रियराजमार्गविषये अपि चर्चा

संसद्-सदस्यः न्यवेदयत् यत् दरभङ्गा-विमानपत्तनस्य नूतनाय सिविल एन्क्लेव-परिसराय यात्रिणां सौकर्यार्थं चतुष्पथमार्गेण सह संयोजनस्य अभ्यर्थना कृता। अपि च सर्वकारेण स्वीकृते सुपौल-दरभङ्गा (वाया बेरिया मञ्ज, मधेपुर) राष्ट्रियराजमार्गनिर्माणे दरभङ्गा-मण्डलस्य द्वयोः संरेखणयोः (Alignments) प्राविधिकपरीक्षणं भौतिकनिरीक्षणं च कारयित्वा समुचितसंरेखणानुसारं निर्माणस्वीकृतिं दातुं प्रार्थना विहिता। तेन बिहारसर्वकारेण घोषितस्य खगड़िया-रोसड़ा राष्ट्रियराजमार्गस्य संरेखणं विस्तार्य दरभङ्गा-सीतामढ़ी-पर्यन्तं चतुष्पथ-राष्ट्रियराजमार्ग-गलियारा विकसितुं प्रस्तावः केन्द्रीयमन्त्रिणः समक्षम् उपस्थापितः।

### रामनगर-लोहियाचौक-मार्गस्य ट्रॉमॉ-केन्द्रस्य च विषयः

संसद्-सदस्यः अवदत् यत् मिथिलायां तथा उत्तरबिहारे आधुनिक-मोटरयान-चालन-प्रशिक्षण-संस्थानस्य स्थापनायाः आवश्यकतापि मन्त्रिणं संबोध्य ज्ञापिता। सहैव NH-527E परियोजनायाः अन्तर्गतं दरभङ्गायाः रामनगरतः लोहियाचौक-लहेरियासराय-पर्यन्तं निर्मीयमाणस्य प्रायः चतुः-किलोमीटर-दीर्घस्य मार्गस्य निर्माणं द्रुतगत्या सम्पादयितुम् आग्रहः कृतः।

एतदतिरिच्य आमस-दरभङ्गा-द्रुतमार्गस्य रामनगर-इण्टरचेञ्ज-समीपे ट्रॉमॉ-केन्द्रस्य स्थापनायाः याचनापि कृता।

### रिंगमार्गः तथा जयनगर-राष्ट्रियराजमार्गस्य विस्तारीकरणस्य अभ्यर्थना

डॉ. ठाकुरः ज्ञापयत् यत् दरभङ्गा-वायुसेनाकेन्द्रस्य सुरक्षामानकानि ध्यात्वा दरभङ्गा-दिल्ली-मोडतः जयनगर-पर्यन्तं राष्ट्रियराजमार्ग-१०५ (NH-105) निर्माणं विस्तारीकरणं च, रोसड़ा-रामनगर-हरितक्षेत्र (Greenfield) मार्गात् निमैठी-मार्गेण बहेड़ी-बहेड़ा-मार्गं (SH-88) यावत् स्पर-लिङ्क-निर्माणं तथा दरभङ्गायां 'रिंग रोड' निर्माणं याच्यते।


# देहि कालिके! समीहितां मदिष्टजीविकाम्



शिष्टवत्सकोऽस्मि भक्तिमान् च ते पदेऽस्म्यहम्,
साधुतास्ति मानसे कृतं सुकर्म कृत्यहम्।
हे मदीयदेवते! सुकालिके! गदाम्यहम्,
देहि देहि सज्जनाय प्रार्थितां सुजीविकाम्।।६६
ज्ञानकर्मसंयुतं भवेन्मदीयजीवनं,
सत्समाजवर्गके सुरक्ष मेऽपि माननम्।
वृत्तिकर्मणा विना कथं जीवामि कालिके!
देहि जीविकां भजामि देहलीपुराधिपे!।।६७
कालिकाप्रदत्तवृत्तितोऽत्र मे समुन्नतिः,
भक्तभावुकेषु तेन ते भवेच्च विश्रुतिः।
वृत्तिवृद्धिभोगदायिके! शृणुष्व कालिके!
चिन्तनीयतां गतोऽस्मि देहलीपुराधिपे!।।६८
कलिकेति कलिकेति मन्त्रकं जपाम्यहं,
भक्तिसागरे मुदा निमज्जनं करोम्यहम्।
भाति जायते मदीयजीवने शुभं शिवम्,
कालिकापदावलम्बनं करोमि शाश्वतम्।।६९
पातु कालिकेऽत्र मां विभातु येन जीवनं,
वृत्तिरोदनं न वेत्सि बुध्यतां निवेदनम्।
लोकसागरं तितीर्षुरस्मि कालिके! द्रुतम्,
जीविकां विना कथं तरामि देवि! कालिके!।।७०
वृत्तिरत्र वर्षतात् मदीयमस्तकेऽपि ते,
सौख्यवैभवान्वितेषु भूरि भूरि दृश्यते।
निर्धनं जनं निधानकं करोतु कालिके!
भ्रश्यते न चेत् समग्रमेव जीवनं शिवे!।।७१
वृत्तिरत्र नास्ति चेन्न शक्यतेऽत्र वर्तितुम्,
वृत्तिरेव वक्ष्यतीह साम्प्रतं तु माननम्।
कालिके! प्रपाहि हे! स्वभक्तमानगौरवम्,
चण्डिके! विरौति बालकोऽद्य लोकयेः स्वयम्।।७२
सिद्धिरेव नास्ति कालिकाभिवन्दनं विना,
काम्यपूर्तिरस्तु देवि! भाव्यतां सुभावना।
सेवते शिशुस्त्वदीयपादुकाद्वयीं मुदा,
भक्तिकाव्यपुष्पगुच्छकं समर्पये तथा।।७३
वृत्तिशून्यता मदीयदुर्भगाय कल्पते,
चक्षुषोश्च मज्झरन्ति भावविन्दवश्च ते।
झङ्कृतास्ति मन्मनस्सुतन्त्रिका शृणोतु हे,
जीविका तवानुकम्पया भवेत् सुकालिके! ७४
शाम्यतीह तेऽनुकम्पयाऽत्र वृत्तिशुष्कतां,
भाति दिव्यजीवनं प्रयाति कष्टकण्टकम्।
कालिके! कृपाम्बुधारयाऽभिसिञ्च बालकं,
धन्यधन्यतां करोतु ते पदे नमाम्यहम्।।७५
कालिका समस्तलोकतारिका वदामि किम्?
दुस्तरे सुदुर्गमे पथेऽपतम् तरामि किम्?।
नैव जायते कृपा चलेत् कथन्नु जीवनम्?,
जीविका सदोत्तमा प्रदेहि भावयाम्यहम्।।७६
कालिकाऽकृपाभवत् शृणोमि कालिदासके,
सुशास्त्रकाव्यकृज्जनेषु ते कृपा प्रसिध्यते।
वर्धितास्ति कामना स्वबालकं विलोकयेः,
देहि मेऽवलम्बनं करं गृहाण कालिके!।।७७
पश्य पीडनं हृदिस्थितं स्ववत्सकस्य मे,
वृत्तिरोदनं करोमि तत्कदा निवार्यते?।
वृत्तिगर्विताः जनाः विलोकयन्ति हेलया,
जीविकान्वितं कुरुष्व कालिके! स्वलीलया।।७८
देवि! मानवीयजीवनं हि वृत्तिमोहितं,
वृत्तिरेव जीवने दधाति सर्वतोऽभयम्।
जीवनेऽभयं च भद्रकं करोतु कालिके!
दीनबालके! दृशं द्रुतं द्रुतं निपातयेः।।७९
मानसेऽस्ति वृत्तिदैन्यशूलमत्र दुःखदम्,
किन्नु बालकं स्वकं तुदस्यलं कथं भृशम्?
वृत्तिवेदनां हरेः विचुम्ब्य बालकाननम् ,
क्रोडबन्धने निधाय रक्ष बालकं प्रियम्।।८०
कालिके! कदाऽन्धकारभारभारिते सुते,
निजास्यचन्द्रचन्द्रिकाप्रभा त्वया निपात्यते?
जीविकाविहीनतानलेन दग्धबालके,
दयाम्बुधेः कणं प्रयच्छ देहलीपुराधिपे!।।८१
प्रस्तरैः विनिर्मिता त्वदीयमूर्तिरस्ति सा,
किमश्मतां प्रयाति मानसं च तेन देवि! हा!।
नैव याचितास्ति देवि! देवलोकसम्पदा,
देहि कालिके! मदर्हवृत्तिरेकदा शुभा।।८२
दीनतोदधौ पतन् रुदन् भजामि कालिकां,
रोहणं कृपाप्रपोतके भवेच्च ते कथम्?
जीवनं कृपां विनात्र जायते तृषामयम्,
जीविकां विना जनश्च कुत्र किं प्रकल्पताम्?।।८३
जीविका त्वया तु नीचकाय चापि दीयते,
शिष्टता मदीयमानसेऽस्ति वृत्तिकामुके।
वेत्सि ह्युच्चशिक्षणे समर्हताऽखिलास्ति मे,
काव्यभावनासु सा च विद्यया प्रभासते।।८४
कॉलिजे नियुक्तये समर्हतीह कालिका,
समुच्चशिक्षणे पदे प्रदीयतां सुजीविका।
बालकस्य सङ्कटं हरिष्यतीह कालिका,
राज्यदानसक्षमासि कास्ति ते नु जीविका?।।८५
सेवनीयमस्ति किं भ्रमन् भवे मृशाम्यहम्,
स्वजीवने समुन्नतिं भवेच्च चिन्तयाम्यहम्।
दूषणं न मानसे कदापि स्वे दधाम्यहम्,
देहि कालिके! चिकीर्षितां मदिष्टजीविकाम्।।८६।।
साधयन्ति चेप्सितान् सुसेव्य दुर्जनाः नराः,
किमत्र मेऽस्ति दूषणं भणामि कालिकाग्रतः।
साधवोऽपि कालिकापदे नयन्ति वृत्तितां,
मयापि तद्विधीयते प्रपश्य देवि! दुर्दशाम्।।८७
सन्ति कोटि कोटयश्च वृत्तिमाश्रिताः जनाः,
किन्तु केन कारणेन वृत्तिवञ्चितोऽस्म्यहम्।
वाग्विभूषणञ्च मेऽस्ति त्वत्कृपावशात् शुभम्,
वृत्तिमण्डितं करोतु सत्वरं हि साम्प्रतम्।।८८
वेत्सि वृत्तिहीनतैव दुःखमत्र भीषणम्,
नाधिकं च कष्टमस्ति मृत्युरत्र निश्चितम्।
वृत्तिदैन्यकुत्सितं पलं पलं च निर्धनम्,
जीविकां प्रदाय धेहि मां शुभे! सुखास्पदम्।।८९
निर्वहामि जीवनं सुवृत्तिकाङ्क्षया सदा,
रौमि रे त्वदग्रतः यथेष्टवृत्तिलालसाः।
देवि! ते कृपाकटाक्षमात्रतो मिलन्ति ताः,
सर्वकामनाश्च सञ्चिताः वदामि ते पुरः ।।९०

क्रमशः ......

**इति श्रीयुवराजभट्टराईकृतं देहलीपुराधिपायाः कालिकायाः वृत्तिप्राप्तिस्तोत्रं श्रीकालिकायै समर्पितम् अस्तु।**



## "संस्कृत कथा मञ्जरी"{७}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

### "अथ दानशक्तिवर्णनं नाम प्रथमोख्यानम्"

ततो भोजराजः स्वमन्त्रिणं प्रशस्य वस्त्रादिनां सम्भाव्य, तत् सिंहासनं नगराभ्यन्तरं नीत्वा, तत्र सहस्रस्तम्भैर्मण्डपं कारयित्वा सुमुहूर्ते तत्र मन्त्रिभिर्विराजमानः विप्रेराशीर्भिरर्चितः वन्दिभिः प्रशंसितः चातुर्वर्ण्यं दान- मानाभ्यां संतोष्य दीन- बधीर- पङ्गु- कुञ्जादीनां दानं दत्वा कुत्रचामराङ्कितो यावत् पुत्तलिकामस्तके पादपद्मं निदधाति तावत् पुत्तलिका मनुष्यवाचा राजानमब्रवीत- भो राजन! विक्रमस्य शौर्य्यौदार्य्य- सत्त्वादिकसादृश्यं यदि विद्यते तर्हि अस्मिन सिंहासने समुपविश। राजाऽब्रवीत्- हे पुत्तलिके! मम त्वयोक्तं सर्वंमीदार्य्यादिकं विद्यते किं न्यूनमस्ति? मयाऽपि सर्वेषाम् अर्थिनां कालोचितं दत्तम्। तत् श्रुत्वा पुत्तलिकाऽवदत्- भो राजन्! यः स्वगुणान् कीर्त्तयति, स केवलं दुर्जन एव, सज्जनस्तु नैवं वक्ति। अत एव आत्मनो गुणाः आत्मना न स्तोतव्याः, परेषां निन्दा च न कर्तव्या। इति पुत्तलिकयोक्तं श्रुत्वा सविस्मयो भोजराजः पुनः पुत्तलिकामवदत्- सत्यंमुक्तं त्वया यः स्वगुणान् कीर्त्तयति, स मुर्ख एव। मया मद्गुणाः कीर्त्तिताः तदनुचितमेव। यस्य एतत् सिंहासनं, तस्यौदार्य्यं कथय। पुत्तलिका भणति- भो राजन्! एतत् सिंहासनं विक्रमार्कस्य। स तु सन्तुष्टयेत् अर्थिजनेभ्यः कोटिसुवर्णं प्रयच्छति। त्वयि एवम् औदार्य्यं विद्यते चेत् तर्हि अस्मिन् सिंहासने उपविश। राजा तूष्णीमासीत्।

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य मया काश्चन विचित्राः वार्ताः श्रुताः। एकेन ग्राहकेन दश- अङ्गुलात्मकः पिज्जा-भक्ष्यः आदिष्टः। किन्तु आपणिकेन सप्त-अङ्गुलात्मकः एव भक्ष्यः प्रेषितः। ततः ग्राहकेन न्यायालयः आश्रितः। तेन क्षतिपूर्तिरूपेण दशसहस्रं रूप्यकाणि प्राप्तानि।

**नन्दिनी-** अहो! स्वाधिकारस्य सम्यक् उपयोगः कृतः तेन। मया अपरा वार्ता पठिता। अमेरिका- देशस्य सेनाविभागेन सैनिकानां कृते एका नूतना योजना घोषिता। यैः सैनिकैः पुनः सेवा अङ्गीकृता, तेभ्यः 'जी.टी.ए. ६' इति क्रीडां क्रीडितुं चतुर्णां दिनानां विरामः प्रदत्तः।

**काव्या-** क्रीडायै विरामः दत्तः इति अतीव विचित्रम्। बेङ्गलूरुनगरे अपि एका महिला गृहम् अन्वेष्टुं गतवती अस्ति। तया नूतन-गृहस्य कृते साक्षात्कारः दत्तः। किन्तु तत्र गृहस्वामिना तस्यै एकम् उद्योगपदं प्रदत्तम्!

**नन्दिनी-** किम्? गृहम् अन्विच्छन्त्या तया उद्योगः प्राप्तः! महदाश्चर्यम्। चीनदेशे एकेन छात्रेण परीक्षायां वञ्चना कृता। तेन कृत्रिम-मेधा-युक्तम् उपनेत्रं धृतम्। किन्तु तस्य यन्त्रे दोषः उत्पन्नः। ततः उपनेत्रे हरित-वर्णस्य प्रकाशः दृष्टः, सः च निरीक्षकेन गृहीतः।

**काव्या-** अहो तस्य मूर्खता! सत्यमेव इमाः वार्ताः अतीव विचित्राः।